# साधना-शृङ्खला

# Sādhanā Shṛṅkhalā



# साधना-शृङ्खला

# *Sādhanā Shṛṅkhalā*

*Published by*
Shrī Chitrāpur Maṭh
Shirālī, Uttara Kannaḍa Dist.
PIN-581 354 Karnāṭaka, INDIĀ

1st Edition, 4th July 2008
2nd Edition, 15th June 2014
3rd Edition, 19th April 2019
4th Edition, 06th December 2019

Copies : 500

Photo Credit : Shrī Kishan Kalliānpur

Designed, Printed by :
Aridra Printers
Malleswaram, Bengaluru-3.
Phone : 080-2334 6025
e-mail : aridraprinters@gmail.com


परम पूज्य पाण्डुरङ्गाश्रम स्वामीजी


परम पूज्य आनन्दाश्रम स्वामीजी


परम पूज्य परिज्ञानाश्रम स्वामीजी III


परम पूज्य सद्योजात शङ्कराश्रम स्वामीजी

# अनुक्रमणिका


| विषयः | | पृष्ठ संख्या |
|---|---|---|
| १. | प्रस्तावना - साधना-शृङ्खला - २०१९ | vii |
| २. | प्रस्तावना - साधना-शृङ्खला - २०१४ | viii |
| ३. | मठप्रार्थनाः - | १-५ |
| | सभा-प्रारम्भ-प्रार्थना, सभा-समाप्ति-प्रार्थना | १ |
| | श्रीचित्रापुरमठ-गुरुपरम्परा-समूह गीत | २ |
| | श्रीगुरुपादुकास्तोत्रम् | ३ |
| | श्रीपरिज्ञानाश्रमत्रयोदशी | ४ |
| ४. | पूजन-सामग्रीसूची | ६ |
| ५. | पूजन-सामग्रीचित्राणि | ७ |
| ६. | विविध-मुद्राचित्राणि | ८ |
| ७. | पूजापूर्वाङ्गः | ९ |
| ८. | श्रीगुरुपूजनम् | १७ |
| ९. | श्रीशिवपूजनम् | २९ |
| १०. | श्रीदेवीपूजनम् | ४१ |
| ११. | नवरात्रि-नित्यपाठः - | ५३-७६ |
| | देव्याः कवचम् | ५३ |
| | अर्गलास्तोत्रम् | ५८ |
| | कीलकस्तोत्रम् | ६१ |

| | | |
|---|---|---|
| | तन्त्रोक्तं रात्रिसूक्तम् | ६२ |
| | महिषान्तकरीसूक्तम् | ६४ |
| | अपराजितास्तोत्रम् | ६८ |
| | नारायणीसूक्तम् | ७१ |
| | देव्यपराधक्षमापनस्तोत्रम् | ७५ |
| १२. | श्रीदेवी-अनुष्ठानम् - सामग्री | ७७ |
| | विधिनियोगः | ७८ |
| | श्रीदेवी-अनुष्ठानम् | ७९ |
| १३. | श्रीललितासहस्रनामस्तोत्रम् | ८० |
| १४. | श्रीमद्भगवद्गीता- | १००-१०६ |
| | ध्यानश्लोकाः | १०० |
| | द्वादशोध्यायः - भक्तियोगः | १०१ |
| | पञ्चदशोध्यायः - पुरुषोत्तमयोगः | १०४ |
| १५. | श्रीशिवमानसपूजास्तोत्रम् | १०७ |

# CONTENTS


| Item | | Page Number |
|---|---|---|
| 1. | Preface to Sādhanā Shṛṅkhalā - 2019 edition | vii |
| 2. | Preface to Sādhanā Shṛṅkhalā - 2014 edition | viii |
| 3. | Math Prayers | 1-5 |
| | Sabhā Prārambha Prārthanā, Sabhā Samāpti Prārthanā | 1 |
| | Shrī Chitrāpur Math Signature Tune | 2 |
| | Shrī Guru Pādukāstotram | 3 |
| | Shrī Parijñānāshram Trayodashī | 4 |
| 4. | List of Items required for Pūjan-s | 6 |
| 5. | Pictures illustrating Pūjā Sāmagrī-s | 7 |
| 6. | Pictures illustrating different Mudrā-s | 8 |
| 7. | Pūjā Pūrvāṅga (Common to All Pūjan-s) | 9 |
| 8. | Shrī Guru Pūjanam | 17 |
| 9. | Shrī Shiva Pūjanam | 29 |
| 10. | Shrī Devī Pūjanam | 41 |
| 11. | Navarātri Nityapātha – | 53-76 |
| | Devyāh Kavacham | 53 |
| | Argalāstotram | 58 |
| | Kīlakastotram | 61 |
| | Tantroktam Rātrisūktam | 62 |
| | Mahishāntakarīsūktam | 64 |
| | Aparājitāstotram | 68 |

| | | |
|---|---|---|
| | Nārāyaṇīsūktam | 71 |
| | Devyaparādhakshamāpanastotram | 75 |
| 12. | Shrī Devī Anushthānam - List of Items required | 77 |
| | Instructions | 78 |
| | Shrī Devī Anushthānam | 79 |
| 13. | Shrī Lalitāsahasranāmastotram | 80 |
| 14. | Shrīmad Bhagavadgītā – | 100-106 |
| | Dhyānashloka-s | 100 |
| | Adhyāya 12 – Bhaktiyoga | 101 |
| | Adhyāya 15 – Purushottamayoga | 104 |
| 15. | Shrī Shivamānasapūjāstotram | 107 |

# Preface to Reprint of Sādhanā Shṛṅkhalā

Sādhanā-shṛṅkhalā is a set of spiritual practices to be performed over 5 days to assist sādhaka-s and sādhikā-s tune into the Divine.

First introduced in the Tercentenary year 2008, it was offered by each of the sabhā-s in a relay chain - hence the name Sādhanā-shṛṅkhalā. Dr.Gajānan Maṅkikar was at the helm, coordinating this activity amongst sabhā-s in that year.

The idea for a manual documenting these practices was mooted by Shrī Maṅgesh Hoskoṭe of Virginia USA, along with an offer to sponsor the publication. And so it was published in 2008 and reprinted in 2014.

The continued demand for this spiral-bound-book encouraged the Publications Committee to print a 3rd edition with the addition of the Shrīgurupādukāstotram.

The Committee appreciates and acknowledges the support rendered by our Beṅgaḷūru team of volunteers - including the Gīrvāṇapratishthā teachers – who diligently did the proof-reading and corrections, and to M/s Aridrā Printers for the printing of this precious book.

The Publications Committee of Shrī Chitrāpur Math is happy to offer this edition, with praṇāma-s, at the Lotus Feet of Lord Bhavānīshaṅkar, the Guruparamparā and our beloved Gurudeva, His Holiness Shrīmat Sadyojāt Shaṅkarāshram Swāmījī.

For the Publications Committee
Prakāsh Haṭṭaṅgaḍī
19th April, 2019

## Preface to Reprint of Sādhanā Shṛṅkhalā

The Sādhanā Shṛṅkhalā was first published during the Tercentenary of Shrī Chitrāpur Maṭh (2008) to fulfill the need for a single manual that contained all the constituents of the Sādhanā Shṛṅkhalā - Lalitā Sahasranāma, Navarātri Nitya Pāṭha, 12th & 15th Chapter of the Bhagawad Gītā, Shivamānasa Pūjā, Devī Anuṣhṭhānam, and Pūjana-s.

To help those not familiar with Devanāgarī, especially the NRIs, the same was published with Transliteration & Translation in English. This was the Sādhanā Pañchakam, in two volumes.

However, while the Sādhanā Pañchakam served the needs of a specific section of devotees, the single volume Sādhanā Shṛṅkhalā continued to remain popular as a manual to be used during Sannikarṣha and Anuṣhṭhāna-s due to its smaller size, and spiral binding.

On popular demand and a request from many Sādhaka-s, we are happy to offer this reprinted edition at the Lotus Feet of Lord Bhavānīshaṅkar, the Guruparamparā and our beloved Gurudeva, His Holiness Shrīmat Sadyojāt Shaṅkarāshram Swāmījī.

For the Publications Committee
Dr. Prakāsh Māvinkurve,
15th June 2014

# Math Prayers

## ।। श्रीचित्रापुरमठः श्रीवल्ली ।।

## ॥ सभा–प्रारम्भ–प्रार्थना ॥

दक्षिणास्यसमारम्भा शङ्कराचार्यमध्यमा ।
अस्मदाचार्यपर्यन्ता स्मर्या गुरुपरम्परा ॥१॥

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादं शङ्करँल्लोकशङ्करम् ॥२॥

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥३॥

ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ॥४॥

परिज्ञानाश्रम श्रीगुरुशङ्कर परिज्ञानाश्रम शङ्करसद्गुरु ।
केशव वामन कृष्ण पाण्डुरङ्ग आनन्द परिज्ञानगुरु ।
सद्योजात शङ्करसद्गुरु ॥५॥

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुस्साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः ॥६॥

ॐ सह नाववतु । सह नौ भुनक्तु । सहवीर्यं करवावहै ॥
तेजस्विनावधीतमस्तु मा विद्विषावहै ॥
॥ ॐ शान्तिः शान्तिः शान्तिः ॥७॥

## सभा–समाप्ति–प्रार्थना

नन्दन्तु साधकाः सर्वे विनश्यन्तु विदूषकाः ।
अवस्था शाम्भवी मेऽस्तु प्रसन्नोऽस्तु गुरुः सदा ।।
सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखमाप्नुयात् ।।
।। ॐ शान्तिः शान्तिः शान्तिः ।।

## Shrī Chitrāpur Ma<u>th</u> Signature Tune

# श्रीचित्रापुर मठ गुरुपरंपरा समूह गीत

गुरुदेवों की अमर शक्ति से निकले प्रेम प्रवाह की जय हो
(गुरु) परंपरा स्थित भक्ति गर्व से उमड रहे उत्साह की जय हो
भवानी शंकर अनुग्रहित चित्रापुर मठ संस्थान की जय हो
विद्या विनय विवेक समन्वित सरस्वती संतान की जय हो
सारस्वत समाज की जय हो
सरस्वती संतान की जय हो
जय हो, जय हो, जय हो

**अंतरा**

दिव्य ज्योति हर दिल में जगाकर मठ की कीर्ति बढाते रहेंगे
गुरु आज्ञा पर नतमस्तक हो साधना पथ पर बढते रहेंगे
भ्रांति भंवर से बचानेवाले नाव को पार लगानेवाले
हम सब के गुरुराज की जय हो

* * *

# श्रीगुरुपादुकास्तोत्रम्

प्रणम्य संविन्मार्गस्थान् आगमज्ञान्महागुरून् ।
प्रायश्चित्तं प्रवक्ष्यामि सर्वतन्त्राविरोधतः ॥१॥

प्रमाददोषजमल-प्रविलापनकारणम् ।
प्रायश्चित्तं परं सत्यं श्रीगुरोः पादुकास्मृतिः ॥२॥

यस्य श्रीपादरजसा रञ्जते मस्तके शिवः ।
रमते सह पार्वत्या तस्य श्रीपादुकास्मृतिः ॥३॥

यस्मै सर्वस्वमात्मानम् अप्येकवृत्तिभक्तितः ।
समर्पयति सच्छिष्यस्तस्य श्रीपादुकास्मृतिः ॥४॥

यस्य पादतले सिद्धाः पादाग्रे कुलपर्वताः ।
गुल्फौ नक्षत्रवृन्दानि तस्य श्रीपादुकास्मृतिः ॥५॥

आधारे परमा शक्तिः नाभिचक्रे हृदाज्ञयोः ।
योगिनीनां चतुःषष्ठिः तस्य श्रीपादुकास्मृतिः ॥६॥

शुक्लरक्तपदद्वन्द्वं मस्तके यस्य राजते ।
शाम्भवं तु तयोर्मध्ये तस्य श्रीपादुकास्मृतिः ॥७॥

अन्यत्सर्वं सप्रपञ्चं निष्प्रपञ्चा गुरोः स्मृतिः ।
तस्माच्छ्रीपादुकाध्यानं सर्वपापनिकृन्तनम् ॥८॥

पालनाद्दुरितच्छेदात् कामितार्थप्रपूरणात् ।
पादुका-मन्त्रशब्दार्थं विमृशन् मूर्ध्नि पूजयेत् ॥९॥

श्रीगुरोः पादुकास्तोत्रं प्रातरुत्थाय यः पठेत् ।
नश्यन्ति सर्वपापानि वह्निना तूलराशिवत् ॥१०॥

काशीक्षेत्रं निवासस्तव चरणजलं जाह्नवी श्रीगुरो नः ।
साक्षाद्विश्वेश्वरो नस्तव वचनतया तारकब्रह्मबोधे ॥११॥

त्वच्छ्रीपादाङ्किताभूरिह भवति गयात्वत्प्रसङ्गः प्रयागः ।
त्वत्तोन्यत् तीर्थदेवः क्वचिदपि च वयं न प्रतीमः पृथिव्याम्॥१२॥

## Shrī Parijñānāshram Trayodashī

# श्रीपरिज्ञानाश्रमत्रयोदशी

आनन्दाश्रमशिष्याग्र्यं स्वानन्दाम्बुधिमज्जितम् ।
आनन्दाश्रमिणं वन्दे परिज्ञानाश्रमं गुरुम् ॥ १ ॥

श्रीविद्योपासनोद्याने मायूरं विभ्रमं सदा ।
यश्चक्रे तं नुमो नित्यं परिज्ञानाश्रमं गुरुम् ॥ २ ॥

बाल्ये दीपनमस्कारे यस्य वैराग्यधीशिखा ।
जज्वाल तं सदा वन्दे परिज्ञानाश्रमं गुरुम् ॥ ३ ॥

शिष्यान्तश्शोधने यद्वत्तद्वद्यन्त्रालिशोधने ।
कौतुकं यस्य तं वन्दे परिज्ञानाश्रमं गुरुम् ॥ ४ ॥

भवरोगहरो योऽभूच्छिवयोगपरोऽनिशम् ।
तं वन्दे सिद्धिसम्पन्नं परिज्ञानाश्रमं गुरुम् ॥ ५ ॥

शुनि चैव समदृष्टा ज्ञानीत्यागमदृष्टये ।
आसीद्यस्तं नुमो हार्दं परिज्ञानाश्रमं गुरुम् ॥ ६ ॥

सारस्वतजनप्रीतस्सारस्वतसमर्चकः ।
य आसीत् तं मुदा वन्दे परिज्ञानाश्रमं गुरुम् ॥ ७ ॥

विद्यावृद्धस्तपोवृद्धो वयोवृद्धाश्रयो बभौ ।
यः कारुण्येन तं वन्दे परिज्ञानाश्रमं गुरुम् ॥ ८ ॥

योऽनुकर्तुं विभुं चक्रे विश्ववस्त्वालयङ्करम् ।
वस्त्वागारं नुमस्तं श्रीपरिज्ञानाश्रमं गुरुम् ॥ ९ ॥

निर्ममे निर्ममेन्द्रो यस्स्तवान् वेदान्तवासितान् ।
गीतासक्तं नुमस्तं श्रीपरिज्ञानाश्रमं गुरुम् ॥ १० ॥

कैवल्यसन्निकर्षत्वे तथाऽहङ्गहचिन्तने ।
यस्यासीद्हृदयं वन्दे परिज्ञानाश्रमं गुरुम् ॥ ११ ॥

भक्तचेतोरथाध्यक्षो रथयात्रां महेशितुः ।
यश्चक्रे तं नुमोऽजस्रं परिज्ञानाश्रमं गुरुम् ॥ १२ ॥

दुर्गं निर्माय दुर्गायै स्वसर्गं यो रुरोध तम् ।
अपवर्गपदं वन्दे परिज्ञानाश्रमं गुरुम्
अपवर्गप्रदं वन्दे परिज्ञानाश्रमं गुरुम् ॥ १३ ॥

श्री श्री परिज्ञानाश्रमयतीश्वराणां
तुर्याश्रमालङ्कृतिरूपकाणाम् ।
स्तोत्रं पठेद्यः प्रयतः प्रणम्रः
प्राप्नोति पूर्णां करुणां गुरूणाम् ॥

***

## LIST OF ITEMS REQUIRED FOR PŪJAN

| **Per Station (one station can host 3 devotees)** |
| --- |
| Chowraṅg |
| Pal̄eru / Somasūtra* |
| Tīrtha Pātra |
| Adorned Pal̄eru for keeping the vigraha after the snāna |
| Agarbattī Stand |
| Lamp |
| Vigraha (Small Pair of Silver Pādukā-s) |
| Match Box |
| **Per Person** |
| One Kalash filled with water* |
| Āchamana Pātra - 2 Nos* |
| Āchamana Pal̄eru* |
| Kāynso - 2 Nos.* |
| Large plate to keep vāṭī-s (gindal/bowls) |
| Vāṭī-s for Gandha, Akshata, Prasāda, Kuṅkuma, Hal̄adī-5 Nos. |
| Dīpa - diyā* |
| Small plate for flowers |
| Small plate for Āratī |
| Karpūra - diyā* |
| Nīlāñjana - diyā* |
| Pūjā Sāhitya |
| Gandha |
| Akshata |
| Kuṅkuma |
| Hal̄adī |
| Bhasma |
| Flowers |
| Bilwa Patra |
| Tulsī - at least 10 'dala' |
| Cotton wick - for dīpa, diyā and nīlāñjana |
| Oil |
| Karpūra |
| Agarbattī |
| Prasāda |
| Pān Vīḍo |
| Dakshiṇā |

# ४. सचित्र पूजा सामग्री



# १. मुद्रा



# Pūjā Pūrvāṅga

**(Common to all Pūjan-s)**

ॐ

# पूजा पूर्वाङ्गः

i) Index finger (तर्जनी ) not to be used in Pūjan.

ii) For doing the Saṅkalpa, one must have the following information - Country, region, city, year (according to Hindū Calendar) whether 'Dakshiṇāyana' or 'Uttarāyaṇa', season, month (according to Hindū calendar) whether Shukla Paksha or Kṛshṇa Paksha, 'tithī', date (according to Hindū calendar) Hindū name of the day of the week and one's gotra. The Saṅkalpa states which deity's pūjā is being performed and for what purpose. Hence for Gurupūjan it will be श्रीगुरुप्रसाद सिध्द्यर्थे श्रीगुरुपूजनं करिष्ये, For Shivapūjan it will be श्रीभवानीशङ्करप्रसादसिध्द्यर्थे श्रीशिवपूजनम् करिष्ये, For Devīpūjan it will be श्रीदेवीप्रसादसिध्द्यर्थे श्रीदेवीपूजनं करिष्ये, (श्री जगदम्बा प्रसाद सिध्द्यर्थे श्रीदेवीपूजनं करिष्ये) Please prepare your saṅkalpa in writing according to the details given in the Math calendar for every pūjan).

1) **आचमनम्** – With your left hand, pour a spoonful of water in your right palm. Put this water in your mouth, but do not sip it. Do this 3 times. Each time, chant one line from the Mantra-s given below. The fourth time let the water run down your right anāmikā (ring finger) and madhyamā (middle finger) into the āchamana plate. With this, chant the fourth line.

**ॐ ऐं आत्मतत्त्वं शोधयामि नमः स्वाहा ।**

**ॐ ह्रीं विद्यातत्त्वं शोधयामि नमः स्वाहा ।**

**ॐ क्लीं शिवतत्त्वं शोधयामि नमः स्वाहा ।**

**ॐ ऐं ह्रीं क्लीं सर्वतत्त्वं शोधयामि नमः स्वाहा ।**

2) **प्राणायामः** – 3 rounds of anuloma-viloma. Close your right nostril with your right thumb. Breathe in deeply, as silently as possible, through your left nostril. Then closing the left nostril with the ring finger, breathe out from right nostril. Breathe in through the right and release through left. This is 1 cycle. Do 3 such cycles. Inhale for 5 counts, exhale for 10 counts, you can use Iṣhṭamantra to keep count.

3) **प्रोक्षणम्** – Take a spoon of water in your left palm. With your right anāmikā and madhyamā sprinkle some of this water on yourself, 4 times, clockwise, from left shoulder, over head on the left, over head on the right and then over right shoulder. You can say Iṣhṭamantra while doing prokṣhaṇa.

4) **स्वस्तिवाचनम्** – Sit with namaskāra mudrā while chanting.

## स्वस्तिवाचनम्

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्यों अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥१॥
ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं
यज्ञ (गं) समिमं दधातु । विश्वेदेवाऽस इहमादयन्तामोऽम् प्रतिष्ठ ॥२॥
एष वै प्रतिष्ठा नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते
सर्वमेव प्रतिष्ठितं भवति ॥३॥

(Offer akṣhata to pādukā-s)

5) **प्रार्थना** – Sit with hands in namaskāra mudrā while chanting

## प्रार्थना

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥१॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेत् श्रुणुयादपि ॥२॥

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥३॥

शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥४॥

अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ।
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥५॥

वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥६॥

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते ॥७॥

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥८॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥९॥

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥१०॥

विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् ।
सरस्वतीं प्रणम्यादौ शुभं कर्म समारभेत् ॥११॥

ॐ श्री सद्गुरुचरणकमलेभ्यो नमः।
श्रीमन्महागणाधिपतये नमः । उमामहेश्वराभ्यां नमः।
लक्ष्मीनारायणाभ्यां नमः। वाणीहिरण्यगर्भाभ्यां नमः।
शचीपुरन्दराभ्यां नमः । इष्टदेवताभ्यो नमः।
कुलदेवताभ्यो नमः । ग्रामदेवताभ्यो नमः।
स्थानदेवताभ्यो नमः। वास्तुदेवताभ्यो नमः।
एतत्कर्मप्रधानदेवताभ्यो नमः। सर्वेभ्यो देवेभ्यो नमः ।
सर्वेभ्यो महापुरुषेभ्यो नमो नमः ॥१२॥

6) **सङ्कल्पः-** Hold a spoonful of water in left hand. Take a तुलसी दल in right hand between the thumb, madhyamā (middle finger) and anāmikā (Ring Finger). Chant the Saṅkalpa. Once the Saṅkalpa is over, pour the water over the तुलसी दल and offer तुलसी दल to Pādukā-s. (water should fall in the āchamana plate.)

ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्री ब्रह्मणः द्वितीयपरार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बुद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गत देशैकदेशे ..... क्षेत्रे ..... नगरे ..... नामसंवत्सरे ..... अयने ..... ऋतौ ..... मासे ..... पक्षे ..... पुण्यतिथौ ..... वासरे सर्वेषु ग्रहेषु यथा यथा राशिस्थानस्थितेषु ..... नामा ..... गोत्रोत्पन्नोऽहं / गोत्रोत्पन्नाऽहं सर्वेषां सारस्वतमहाजनानां श्रीगुरु/भवानीशङ्कर/देवी प्रसादसिद्ध्यर्थे यथाज्ञानं यथाशक्ति यथामिलितोपचारैः श्रीगुरु/भवानीशङ्कर/देवी पूजनं करिष्ये।

7) **घण्टापूजनम् :** Ring the bell slightly with your left hand. With your right hand, apply gandha, akshata and petals. Keep it down and do namaskāra while chanting shloka

**ॐ आगमार्थं तु देवानां गमनार्थं तु रक्षसाम्।**
**घण्टानादं प्रकुर्वीत पश्चाद् घण्टां प्रपूजयेत्॥**
**ॐ घण्टास्थदेवतायै नमः।**
**सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।**

8) **वरुणध्यानम् :** With your right anāmikā, take some gandha. On the floor in front of you towards your right, draw an ashṭadala like this - i) + ii) ✳ iii) ❀

On this apply some gandha, put akshata and petals. Place kalasha of water on it. Chant the shloka

Do namaskāra while reciting Shloka-s

ॐ नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय ।
सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥
ॐ वरुणं ध्यायामि आवाहयामि पूजयामि ।

9) **कलशपूजनम् :** Apply gandha on the kalasha, in this order - east, south, west and north (clockwise). On the gandha put some akshata and petals.

Now chant

सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः ॥

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥
कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।
अङ्गैश्च सहिताः सर्वे कलशे तु समाश्रिताः ॥

Place your right hand on top of the kalasha and chant

ॐ भूर्भुवः स्वः अस्मिन्कलशे वरुणं साङ्गं सपरिवारं
सायुधं सशक्तिकम् आवाहयामि, पूजयामि

i) Hold your hands in dhenu mudrā over the kalasha, gently rotate the wrists 5 times clockwise, chanting ॐ वं वरुणाय नमः

ii) Then do the matsya mudrā over the kalasha. Rotate thumbs of both hands gently 5 times while chanting ॐ वं वरुणाय नमः

iii) Do the aṅkusha mudrā with मध्यमा (middle finger) of right hand, bring it down in a curve from head level to the kalasha. The madhyamā should touch the water in the kalasha. While doing this, chant -

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ।।
सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ।

Offer gandha, akshata, petals to the water in the kalasha.
Do namaskāra and chant

ॐ पूर्वे ऋग्वेदाय नमः । ॐ दक्षिणे यजुर्वेदाय नमः ।
ॐ पश्चिमे सामवेदाय नमः । ॐ उत्तरे अथर्वणवेदाय नमः ।
ॐ कलशमध्ये अपाम्पतये वरुणाय नमः ।।

10. कलशप्रार्थना – Recite with namaskāra mudrā

त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव ।
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ।।
प्रसन्नो भव । वरदो भव ।
अनया पूजया वरुणाद्यावाहिता देवताः प्रीयन्तां न मम ।

Keep aside the previous Taṭṭe Kāyaso. This will be for your use. Place second Taṭṭe Kāyaso in the plate. Pour abhimantrita water from the kalasha into it. This is exclusively to be offered to the deity.

11. शङ्खपूजनम् –

a. Rinse the shaṅkha. Pour into it some abhimantrita water, apply gandha, offer akshata and flowers, place it on its stand. Do namaskāra and chant -

ॐ शं पाञ्चजन्याय नमः । सर्वोपचारार्थे गन्धाक्षतपुष्पाणि
समर्पयामि, नमस्करोमि ।

b. If one does not have a shaṅkha, take spoonful of abhimantrita water, put gandha-akshata-flowers on it and use it for the next step. Do not chant the above shloka.

12. **प्रोक्षणम्**–Hold the shaṅkha/spoon with left hand. Taking tulasī dala in your right hand, sprinkle abhimantrita water on all pūjā items to sanctify them. Chant Ishṭamantra while doing this.

13. **आत्मप्रोक्षणम् :** Pour a litle abhimantrita water from shaṅkha on left palm. (or from spoon) with tulasīdala held with the right middle finger, ring finger and thumb, sprinkle water on yourself (as done in प्रोक्षणम् at point 3) chanting the following:

**ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।**
**यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥**

14. **आसनशुध्दिः**–Slightly fold back front right hand corner of your āsana. Using gandha, with your anāmikā draw a ▽ on the floor. The apex should point towards you. Apply gandha in the ▽, offer akshata and flowers; hold right madhyamā and anāmikā in the ▽ and chant shloka (If seated on chair, it can be done on the chair)

**ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता।**
**त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥**

Do Namaskāra and recite

**ॐ आधारशक्तये नमः, ॐ कूर्मासनाय नमः,**
**ॐ अनन्तासनाय नमः, ॐ विमलासनाय नमः,**
**ॐ आत्मासनाय नमः।**
**सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।**

15. **दिग्बन्धः**– Hold hands in trishūla mudrā at forehead level. Rotate the wrists gently thrice in clockwise direction. Chant-

**ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः।**
**ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥**

16. **दीपपूजनम्** – Offer gandha, akshata and flowers to the divli. Do namaskāra and chant the shloka -

दीपो ज्योतिः परब्रह्म दीपो ज्योतिर्जनार्दनः ।
दीपो हरतु मे ध्वान्तं संविद्दीप नमोस्तु ते ॥
ॐ दीपदेवतायै नमः,
सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ।

17. **भैरवपूजनम्** – Apply gandha and akshata to a flower and place it on the stool on the right side of the deity (outside the somasutra/plate on which pādukā-s are kept) chant -

ॐ तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ।
ॐ भं भैरवाय नमः,
सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ।

***

## SHRĪ GURU PŪJANAM

# श्रीगुरुपूजनम्

### ध्यानम्

(नमस्कार मुद्रा)

**द्विदलकमलमध्ये बद्धसंवित् सुमुद्रं धृतशिवमयगात्रं साधकानुग्रहार्थम् ।**
**श्रुतिशिरसिविभान्तं बोधमार्तण्डमूर्तिं शमिततिमिरशोकं श्रीगुरुं भावयामि ।।**
**हृदम्बुजे कर्णिकमध्यसंस्थं सिंहासने संस्थितदिव्यमूर्तिम् ।**
**ध्यायेद्गुरुं चन्द्रकलाप्रकाशं चित्पुस्तकाभीष्टवरं दधानम् ।।**

*ॐ श्री गुरुपादुकाभ्यो नमः । ध्यानं समर्पयामि ।।*

Offer a flower.

### आवाहनम्

(नमस्कार मुद्रा)

**ॐ स्वरूपनिरूपणहेतवे श्रीगुरवे नमः ।**
**ॐ स्वच्छप्रकाशविमर्शहेतवे श्रीपरमगुरवे नमः ।**
**ॐ स्वात्मारामपञ्जरविलीनतेजसे श्रीपरमेष्ठिगुरवे नमः ।।**

*ॐ श्री गुरुपादुकाभ्यो नमः । आवाहयामि, पूजयामि ।।*

Offer akshata.

### आसनम्

**सर्वात्मभावसंस्थाय गुरवे सर्वसाक्षिणे ।**
**सहस्रारसरोजातमासनं कल्पयाम्यहम् ।।**

*ॐ श्री गुरुपादुकाभ्यो नमः । आसनार्थे पुष्पं समर्पयामि ।।*

Offer a flower.

## पाद्यम्

चलाचलनिकेताय चार्पितं पाद्यमुत्तमम् ।
सर्वधर्मपरित्यागं शरणागतितीर्थजम् ॥

*ॐ श्री गुरुपादुकाभ्यो नमः । पादयोः पाद्यं समर्पयामि ॥*

Offer 2 spoons abhimantrita water to Pādukā-s.

## अर्घ्यम्

In a spoonful of abhimantrita water put gandha-akshata pushpa. Offer it to Pādukā-s after chanting shloka.

अनन्यभक्तिसलिलं विनेयगुणमण्डितम् ।
अर्घ्यं तेऽनर्घ्यकैवल्यनाथाय परिकल्पितम् ॥

*ॐ श्री गुरुपादुकाभ्यो नमः । हस्तयोरर्घ्यं समर्पयामि ॥*

## आचमनम्

मनोवाक्कायकर्माख्यं दत्तं ते निर्मलं जलम् ।
गृहीत्वा गुरुराजेन्द्र कुरुष्वाचमनं विभो ॥

*ॐ श्री गुरुपादुकाभ्यो नमः । आचमनीयं जलं समर्पयामि ॥*

Offer 3 spoons abhimantrita water to pādukā-s and one spoon into the Tīrthapātra.

## स्नानम्

(Remove all निर्माल्य carefully ; put in तीर्थपात्र before doing अभिषेकम् with water from तट्टे) chant Shloka

सर्वशास्त्रमयं तोयं सदानिर्मुक्तकल्मष ।
श्रद्धानद्याः समानीतं स्नानार्थं प्रतिगृह्यताम् ॥

*ॐ श्री गुरुपादुकाभ्यो नमः ।*
*स्नानीयं जलम् अभिषेकं च समर्पयामि ॥*
*तदन्ते आचमनीयं जलं समर्पयामि ॥*

Pour one spoon of water in tīrthapātra.

1) Hold पादुका in Napkin with Left hand
2) Do self प्रोक्षण with Right hand with the water from Somasūtra.

3) Remove Somasūtra.

4) Place decorated plate on the stool.

5) Wipe Pādukā-s, Apply little गन्ध and place it in decorated plate

## वस्त्रम्

मायाचित्रपटाच्छन्ननिजगुह्योरुतेजसे ।
ममश्रद्धाभक्तिवासयुग्मं देशिक गृह्यताम् ॥
*ॐ श्री गुरुपादुकाभ्यो नमः । वस्त्रोपवस्त्रं समर्पयामि ॥*
(Offer अक्षत) *तदन्ते आचमनीयं जलं समर्पयामि ॥*
Then pour one spoon water into Tīrthapātra

## चन्दन - अक्षताः

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात्
महावाक्योत्थविज्ञान गन्धाढ्यं तापमोचनम् ।
विलेपनं गुरुश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥
*ॐ श्री गुरुपादुकाभ्यो नमः । चन्दनम् अक्षतान् च समर्पयामि ॥*
Offer a small ball of gandha with anāmikā,madhyamā & thumb

## पुष्पम्

तुरीयवनसम्भूतं दिव्यभावमनोहरम् ।
तारादिमनुपुष्पालिं गृहाण गुरुनायक ॥
*ॐ श्री गुरुपादुकाभ्यो नमः । पुष्पं समर्पयामि ॥*
Offer flowers.

## बिल्वपत्रम्

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रयायुधम् ।
त्रिजन्मपाप संहारमेकबिल्वं शिवार्पणम् ॥
*ॐ श्री गुरुपादुकाभ्यो नमः । बिल्वपत्रम् समर्पयामि ॥*
Offer Belpatrī

(Say श्रीगुरु अष्टोत्तरशतनामावल्यासहित बिल्वार्चने / पुष्पार्चने विनियोगः)

Offer one Bilwa or one flower or petal with each name

# श्रीगुरु-अष्टोत्तर-शतनामावलिः

ॐ सद्गुरवे नमः।

ॐ अज्ञाननाशकाय नमः।

ॐ अदम्भिने नमः।

ॐ अद्वैतप्रकाशकाय नमः।

ॐ अनपेक्षाय नमः।

ॐ अनसूयवे नमः।

ॐ अनुपमाय नमः।

ॐ अभयप्रदात्रे नमः।

ॐ अमानिने नमः।

ॐ अहिंसामूर्तये नमः। (१०)

ॐ अहैतुकदयासिन्धवे नमः।

ॐ अहङ्कारनाशकाय नमः।

ॐ अहङ्कारवर्जिताय नमः।

ॐ आचार्येन्द्राय नमः।

ॐ आत्मसन्तुष्टाय नमः।

ॐ आनन्दमूर्तये नमः।

ॐ आर्जवयुक्ताय नमः।

ॐ उचितवाचे नमः।

ॐ उत्साहिने नमः।

ॐ उदासीनाय नमः। (२०)

ॐ उपरताय नमः।

ॐ ऐश्वर्ययुक्ताय नमः।

ॐ कृतकृत्याय नमः।

ॐ क्षमावते नमः।

ॐ गुणातीताय नमः।

ॐ चारुवाग्विलासाय नमः।

ॐ चारुहासाय नमः।

ॐ छिन्नसंशयाय नमः।

ॐ ज्ञानदात्रे नमः।

ॐ ज्ञानयज्ञतत्पराय नमः। (३०)

ॐ तत्त्वदर्शिने नमः।
ॐ तपस्विने नमः।
ॐ तापहराय नमः।
ॐ तुल्यनिन्दास्तुतये नमः।
ॐ तुल्यप्रियाप्रियाय नमः।
ॐ तुल्यमानापमानाय नमः।
ॐ तेजस्विने नमः।
ॐ त्यक्तसर्वपरिग्रहाय नमः।
ॐ त्यागिने नमः।
ॐ दक्षाय नमः। (४०)
ॐ दान्ताय नमः।
ॐ दृढव्रताय नमः।
ॐ दोषवर्जिताय नमः।
ॐ द्वन्द्वातीताय नमः।
ॐ धीमते नमः।
ॐ धीराय नमः।
ॐ नित्यसन्तुष्टाय नमः।
ॐ निरहङ्काराय नमः।
ॐ निराश्रयाय नमः।
ॐ निर्भयाय नमः।(५०)

ॐ निर्मदाय नमः।
ॐ निर्ममाय नमः।
ॐ निर्मलाय नमः।
ॐ निर्मोहाय नमः।
ॐ निर्योगक्षेमाय नमः।
ॐ निर्लोभाय नमः।
ॐ निष्कामाय नमः।
ॐ निष्क्रोधाय नमः।
ॐ निः संगाय नमः।
ॐ परमसुखदाय नमः।(६०)
ॐ पण्डिताय नमः।
ॐ पूर्णाय नमः।
ॐ प्रमाणप्रवर्तकाय नमः।
ॐ प्रियभाषिणे नमः।
ॐ ब्रह्मकर्मसमाधये नमः।
ॐ ब्रह्मात्मनिष्ठाय नमः।
ॐ ब्रह्मात्मविदे नमः।
ॐ भक्ताय नमः।
ॐ भवरोगहराय नमः।
ॐ भुक्तिमुक्तिप्रदात्रे नमः।(७०)

ॐ मङ्गलकर्त्रे नमः।
ॐ मधुरभाषिणे नमः।
ॐ महात्मने नमः।
ॐ महावाक्योपदेशकर्त्रे नमः।
ॐ मितभाषिणे नमः।
ॐ मुक्ताय नमः।
ॐ मौनिने नमः।
ॐ यतचित्ताय नमः।
ॐ यतये नमः।
ॐ यदृच्छालाभसन्तुष्टाय नमः (८०)
ॐ युक्ताय नमः।
ॐ रागद्वेषवर्जिताय नमः।
ॐ विदिताखिलशास्त्राय नमः।
ॐ विद्याविनयसम्पन्नाय नमः।
ॐ विमत्सराय नमः।
ॐ विवेकिने नमः।
ॐ विशालहृदयाय नमः।
ॐ व्यवसायिने नमः।
ॐ शरणागतवत्सलाय नमः।
ॐ शान्ताय नमः। (९०)
ॐ शुद्धमानसाय नमः।
ॐ शिष्यप्रियाय नमः।
ॐ श्रद्धावते नमः।
ॐ श्रोत्रियाय नमः।
ॐ सत्यवाचे नमः।
ॐ सदामुदितवदनाय नमः।
ॐ समचित्ताय नमः।
ॐ समानाधिकवर्जिताय नमः।
ॐ समाहितचित्ताय नमः।
ॐ सर्वभूतहिताय नमः। (१००)
ॐ सिद्धाय नमः।
ॐ सुलभाय नमः।
ॐ सुशीलाय नमः।
ॐ सुहृदे नमः।
ॐ सूक्ष्मबुद्धये नमः।
ॐ सङ्कल्पवर्जिताय नमः।
ॐ सम्प्रदायविदे नमः।
ॐ स्वतन्त्राय नमः। (१०८)

## धूपम्

Ring bell with Left hand. Wave Agarabattī in front of the Pādukā-s

**पञ्चकोशमयं दिव्यं दशाङ्गं गुग्गुलं गुरो ।**
**दग्ध्वा ज्ञानाग्निना नाथ धूपमाघ्रापयामि ते ॥**
***ॐ श्री गुरुपादुकाभ्यो नमः । धूपम् आघ्रापयामि ॥***

## दीपम्

Gently wave ghee dīpa with the right hand while ringing the bell with the left hand. Put it out immediately

**वैराग्यतैलसम्पूर्णे भक्तिवर्तिसमन्विते ।**
**विवेकपूर्णपात्रेऽहं बोधदीपं प्रदर्शये ॥**
***ॐ श्री गुरुपादुकाभ्यो नमः । दीपं दर्शयामि ॥***

**नैवेद्यम्** - Say हस्तौ प्रक्षाल्य नैवेद्यं पुरतः स्थाप्य,
गायत्र्या सम्प्रोक्ष्य तुलसीदलैः आच्छाद्य - नैवेद्यम्

1) Wash hand. With Right Ring Finger (अनामिका) using गन्ध, draw a 卐 (swastika) in front of Pādukā-s. After washing hand once more, place the नैवेद्यवाटी on it.
2) Place 7 to 8 तुलसीदल in the right palm.
3) Wash these with अभिमन्त्रित water
4) Holding तुलसीदल in right hand, place left hand over it and make धेनुमुद्रा. Hold धेनुमुद्रा over नैवेद्यम् moving wrists gently in a circular clockwise motion while chanting the Guru Gāyatrī Mantra - महापुरुषाय विद्महे परमहंसाय धीमहि ।
तन्नो गुरुः प्रचोदयात् ॥
5) Let some water fall on the नैवेद्य
6) Place one तुलसीदल on नैवेद्य. Then out of the remaining तुलसीदल, take one दल at a time between Thumb,

Madhyamā & Anāmikā of the Right hand, wave over नैवेद्य and offer to the Pādukā-s chanting the following one by one ॐ प्राणाय स्वाहा, ॐ अपानाय स्वाहा, ॐ व्यानाय स्वाहा, ॐ उदानाय स्वाहा, ॐ समानाय स्वाहा. Then say - ॐ प्राणापानव्यानउदानसमाना: showing correct Mudrā-s, waving right hand from नैवेद्य towards the Pādukā-s.

7) Say - ॐ श्री गुरुपादुकाभ्यो नमः

8) आचमनीयं जलं समर्पयामि - Pour one spoon water in तीर्थपात्रम्
पूर्वापोषणं समर्पयामि - Pour one spoon water on नैवेद्यम्

9) Do Namaskāra and Chant नैवेद्यम् –

**ब्रह्मनिष्ठाय नैवेद्यं ब्रह्माण्डाख्यं महौदनम् ।**
**समाधिपक्वमधुरं शिवाय गुरवेर्पितम् ।।**

10) Say - *ॐ श्री गुरुपादुकाभ्यो नमः । नैवेद्यं निवेदयामि ।*
*नानाऋतुफलानि च समर्पयामि ।।*

11) Sit with eyes closed for a minute, then ring the bell once.

12) Say-आचमनीयं जलं समर्पयामि-Offer one spoon water in तीर्थपात्रम्
उत्तरापोषणं समर्पयामि - Offer one spoon water on नैवेद्यम्
मुखप्रक्षालनं समर्पयामि - Offer one spoon water in तीर्थपात्रम्
हस्तप्रक्षालनं समर्पयामि - Offer one spoon water in तीर्थपात्रम्

करोद्वर्तनार्थे चन्दनं समर्पयामि - Apply gandha on both Anāmikā-s (Ring fingers), cross wrists (Right on top) and sprinkle the gandha on Pādukā-s.

## ताम्बूल - दक्षिणा

**जीवब्रह्मैक्यविज्ञान तृप्ताय गुरुमूर्तये ।**
**जीवन्मुक्तिसुखाकारं ताम्बूलं प्रतिगृह्यताम् ।।**

*ॐ श्री गुरुपादुकाभ्यो नमः । सदक्षिणा ताम्बूलं समर्पयामि ।।*

Pour one spoon water on pān, supārī and dakshiṇā

## नीराजनम्

Light the āratī and karpūra. Ring the bell with left hand while doing āratī.

**कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।**
**सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ।**
**त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।**
**त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव ॥**
**नीराजनं निर्मलदीप्तिमद्भिर् दीपांकुरैरुज्ज्वलमुच्छ्रितैश्च ।**
**घण्टानिनादेन समर्पयामि मृत्युञ्जयाय गुरुनायकाय ।**

***ॐ श्री गुरुपादुकाभ्यो नमः । नीराजनं दर्शयामि ॥***

After Āratī is over, keep घाण्टी down, do Āratī to it once;
Do जलारती once with Shaṅkha or spoon of अभिमन्त्रित water, to the Pādukā-s

Pour water in तीर्थपात्र.

Hold the āratī in left hand and say

***ॐ श्री गुरुपादुकाभ्यो नमः । नीराजनं दर्शयामि,***
***तदन्ते जलारार्तिकं समर्पयामि ॥***

Wave right hand over āratī towards deity and say देवाभिवन्दनम्।
Wave hand over āratī towards self and say आत्माभिवन्दनम् ॥

**मन्त्रपुष्पाञ्जलिः :-**

Wash both hands after taking Āratī

(Hold both palms full of flowers, akshata, offer with both hands when Shloka is over)

**नानासुगन्धपुष्पाणि यथा कालोद्भवानि च ।**
**पुष्पाञ्जलिं मया दत्तं गृहाण गुरुनायक ॥**
***ॐ श्री गुरुपादुकाभ्यो नमः । मन्त्रपुष्पाञ्जलिं समर्पयामि ॥***

## प्रदक्षिणा

**प्रदक्षिणा** – (Namaskāra Mudrā Hold hands at chest level, move wrists 3 times in clockwise direction)

Chant परिभ्रमन्ति ब्रह्माण्डकोटयो यस्य सम्पदे ।
तस्य श्रीगुरुनाथस्य संविद्-दृष्ट्या प्रदक्षिणम् ॥
*ॐ श्री गुरुपादुकाभ्यो नमः । प्रदक्षिणां समर्पयामि ॥*

## नमस्कार-प्रार्थना-स्तुति

Sit with namaskāra mudrā while chanting.

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात्परब्रह्म तस्मै श्रीगुरवे नमः ॥
श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादं शङ्करँल्लोकशङ्करम् ॥
शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥
ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ॥
*ॐ श्रीगुरुपादुकाभ्यो नमः । नमस्करोमि ।*
*प्रार्थनां स्तुतिं च समर्पयामि ॥*

# विशेषार्घ्यम्

(Hold spoon of Abhimantrita water with गन्धाक्षतपुष्प in it ready, with right hand. Show it to the deity, and pour in Tīrthapātra after Shloka is over)

**ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं**
**द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।**
**एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं**
**भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥**

*ॐ श्री गुरुपादुकाभ्यो नमः । विशेषार्घ्यं समर्पयामि ॥*

# प्रार्थनापूर्वकं क्षमापनम्

(Sit with namaskāra mudrā)

**अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।**
**दासोऽयमिति मां मत्वा क्षमस्व गुरुपुङ्गव ॥**

*ॐ श्री गुरुपादुकाभ्यो नमः । प्रार्थनापूर्वकं क्षमां याचे ॥*

**समर्पणम् -**

1) Hold spoon of water in Left hand;
2) Hold तुलसीदल in Right hand in front of Pādukā-s, over तीर्थपात्र
3) Chant Shloka

**देवनाथ गुरो स्वामिन् देशिक स्वात्मनायक ।**
**त्राहि त्राहि कृपासिन्धो पूजां पूर्णतरां कुरु ॥**

**अनया पूजया श्रीगुरुः प्रीयताम् ॥ ॐ तत् सत् ब्रह्मार्पणमस्तु ॥**

When saying this pour water on तुलसीदल offer it to Pādukā-s

Do Japa of Ishtamantra for 3 minutes

During सामूहिक पूजन 1) Chant only विनियोग mentally
2) Don't do न्यास to avoid confusion for those who have not been given nyāsa

After इष्टमन्त्र जप, offer जप to इष्टदेव/देवी chanting appropriate मन्त्र from the following:-

**अर्पण मन्त्र-**

देवी श्लोक (१) गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥

देव श्लोक (२) गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्
सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥

**विसर्जन मन्त्र -**

When chanting this shloka touch Pādukā-s with Right अनामिका and मध्यमा, Then touch अनाहत (own heart) when saying "मे हृदि")

तिष्ठ तिष्ठ परस्थाने स्वस्थाने परमेश्वर,
यत्र ब्रह्मादयो देवाः सर्वे तिष्ठन्ति मे हृदि ॥

ॐ नमः पार्वतीपतये हर हर महादेव ॥

(Chant the सभा-समाप्ति-प्रार्थना Page No. 1)

# SHRĪ SHIVA PŪJANAM

# श्रीशिवपूजनम्

**ध्यानम्** - नमस्कार मुद्रा (Namaskāra Mudrā)

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्॥

*ॐ श्री भवानीशङ्कराय नमः। ध्यानं समर्पयामि॥*

Offer a flower

**आवाहनम्** - नमस्कार मुद्रा (Namaskāra Mudrā)

एह्येहि गौरीश पिनाकपाणे शशाङ्कमौले वृषभाधिरूढ।
देवाधिदेवेश महेश नित्यं गृहाण पूजां भगवन् नमस्ते॥

*ॐ श्री भवानीशङ्कराय नमः। आवाहनं समर्पयामि॥*

Offer some akshata

**आसनम्** -

विश्वात्मने नमस्तुभ्यं चिदम्बरनिवासिने।
रत्नसिंहासनं चारु ददामि करुणानिधे॥

*ॐ श्री भवानीशङ्कराय नमः। आसनार्थे पुष्पं समर्पयामि॥*

Offer a flower

**पाद्यम् -**

नमः शर्वाय सोमाय सर्वमङ्गलहेतवे ।
तुभ्यं सम्प्रददे पाद्यं श्रीकैलासनिवासिने ॥
*ॐ श्री भवानीशङ्कराय नमः । पादयोः पाद्यं समर्पयामि ॥*

Offer 2 spoons अभिमन्त्रित water to पादुकाs

**अर्घ्यम् -**

अनर्घफलदात्रे च शास्त्रे वैवस्वतस्य च ।
तुभ्यमर्घ्यं प्रदास्यामि द्वादशान्तनिवासिने ॥
*ॐ श्री भवानीशङ्कराय नमः । हस्तयोरर्घ्यं समर्पयामि ॥*

(offer spoonful water with गन्धाक्षतपुष्प to पादुकाs)

**आचमनम् -**

अशेषजगदाधार निराधार महेश्वर ।
ददाम्याचमनं तुभ्यं सुन्दरेश नमोऽस्तु ते ॥
*ॐ श्री भवानीशङ्कराय नमः । आचमनीयं जलं समर्पयामि ॥*

Offer 3 spoons water on पादुकाs; 1 spoon in तीर्थपात्र

**स्नानम् :-**

(Remove all निर्माल्य carefully ; put in तीर्थपात्र before doing अभिषेकम् with water from तट्टे) chant Shloka)

गङ्गाक्लिन्नजटाभार सोम सोमार्धशेखर ।
नद्या नीरैः समानीतैः स्नानं कुरु महेश्वर ॥
*ॐ श्री भवानीशङ्कराय नमः । स्नानीयं जलम् अभिषेकं च समर्पयामि ॥*
*तदन्ते आचमनीयं जलं समर्पयामि ॥*

Offer one spoon of water in tīrthapātra

1) Hold पादुका in Napkin with Left hand
2) Do self प्रोक्षण with Right hand with the water from Somasūtra
3) Remove Somasūtra
4) Place decorated plate on the stool.
5) Wipe Pādukā-s, Apply little गन्ध and place it in decorated plate

**वस्त्रम् -**

दिगम्बर नमस्तुभ्यं गजाजिनधराय च।
व्याघ्रचर्मोत्तरीयाय वस्त्रयुग्मं ददाम्यहम्॥
*ॐ श्री भवानीशङ्कराय नमः । वस्त्रोपवस्त्रं समर्पयामि ॥*

Offer अक्षताः

Then saying आचमनीयं समर्पयामि Offer 1 spoon water into tīrthapātra

**यज्ञोपवीतम् :-**

चराचर जगद्रत्न प्रोतसूत्रधराय ते।
नागयज्ञोपवीताय ह्युपवीतं ददाम्यहम्॥
*ॐ श्री भवानीशङ्कराय नमः । यज्ञोपवीतं समर्पयामि ॥*

Offer अक्षताः

Then saying - आचमनीयं समर्पयामि Offer 1 spoon water in tīrthapātra.

**भस्म -**

अग्निहोत्रसमुद्भूतं विरजाहोमपावितम्।
गृहाण भस्म हे स्वामिन् भक्तानां भूतिदायक॥
*ॐ श्री भवानीशङ्कराय नमः । भस्मकणान् समर्पयामि ॥*

(Offer भस्म with thumb and अनामिका)

**गन्ध :-**

नमस्सुगन्धदेहाय ह्यवन्ध्यफलदायिने।
तुभ्यं गन्धान् प्रदास्यामि चान्धकासुरभञ्जन॥
*ॐ श्री भवानीशङ्कराय नमः । गन्धं समर्पयामि ॥*

Offer a small ball of gandha with anāmikā,madhyamā & thumb

**अक्षताः -**

अक्षतान् धवलान् देव सिद्धगन्धर्वपूजित।
सुन्दरेश नमस्तुभ्यं गृहाण वरदो भव॥
*ॐ श्री भवानीशङ्कराय नमः । अक्षतान् समर्पयामि ॥*

(Offer akshata)

**पुष्पम् -**

तुरीयवनसम्भूतं परमानन्दसौरभम्।
पुष्पं गृहाण सोमेश पुष्पचापविभञ्जन ॥
*ॐ श्री भवानीशङ्कराय नमः । पुष्पाणि समर्पयामि ॥*

(Offer some flowers)

**बिल्वपत्रम् -**

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रयायुधम्।
त्रिजन्मपापसंहारमेकबिल्वं शिवार्पणम्॥
*ॐ श्री भवानीशङ्कराय नमः । बिल्वपत्रं समर्पयामि ॥*

Offer one belpatrī

(Say श्री शिव अष्टोत्तर शतनामावल्या सहित बिल्वार्चने/पुष्पार्चने विनियोगः)

(Offer a belpatrī/flower with each name)

# श्री शिवाष्टोत्तर शतनामावलिः

ॐ शिवाय नमः ॥
ॐ महेश्वराय नमः ॥
ॐ शम्भवे नमः ॥
ॐ पिनाकिने नमः ॥
ॐ शशिशेखराय नमः ॥
ॐ वामदेवाय नमः ॥
ॐ विरूपाक्षाय नमः ॥
ॐ कपर्दिने नमः ॥
ॐ नीललोहिताय नमः ॥
ॐ शङ्कराय नमः ॥ (१०)
ॐ शूलपाणये नमः ॥
ॐ खट्वाङ्गिने नमः ॥
ॐ विष्णुवल्लभाय नमः ॥
ॐ शिपिविष्टाय नमः ॥
ॐ अम्बिकानाथाय नमः ॥
ॐ श्रीकण्ठाय नमः ॥
ॐ भक्तवत्सलाय नमः ॥
ॐ भवाय नमः ॥
ॐ शर्वाय नमः ॥
ॐ त्रिलोकेशाय नमः ॥ (२०)
ॐ शितिकण्ठाय नमः ॥
ॐ शिवा-प्रियाय नमः ॥
ॐ उग्राय नमः ॥
ॐ कपालिने नमः ॥
ॐ कामारये नमः ॥
ॐ अन्धकासुरसूदनाय नमः ॥
ॐ गङ्गाधराय नमः ॥
ॐ ललाटाक्षाय नमः ॥
ॐ कालकालाय नमः ॥
ॐ कृपानिधये नमः ॥ (३०)
ॐ भीमाय नमः ॥
ॐ परशुहस्ताय नमः ॥
ॐ मृगपाणये नमः ॥
ॐ जटाधराय नमः ॥
ॐ कैलासवासिने नमः ॥
ॐ कवचिने नमः ॥
ॐ कठोराय नमः ॥
ॐ त्रिपुरान्तकाय नमः ॥
ॐ वृषाङ्काय नमः ॥
ॐ वृषभारूढाय नमः ॥ (४०)
ॐ भस्मोद्धूलित-विग्रहाय नमः ॥
ॐ सामप्रियाय नमः ॥
ॐ स्वरमयाय नमः ॥
ॐ त्रयीमूर्तये नमः ॥
ॐ अनीश्वराय नमः ॥
ॐ सर्वज्ञाय नमः ॥
ॐ परमात्मने नमः ॥
ॐ सोमसूर्याग्निलोचनाय नमः ॥
ॐ हविषे नमः ॥
ॐ यज्ञमयाय नमः ॥ (५०)
ॐ सोमाय नमः ॥
ॐ पञ्चवक्त्राय नमः ॥
ॐ सदाशिवाय नमः ॥
ॐ विश्वेश्वराय नमः ॥
ॐ वीरभद्राय नमः ॥
ॐ गणनाथाय नमः ॥
ॐ प्रजापतये नमः ॥
ॐ हिरण्यरेतसे नमः ॥

ॐ दुर्धर्षाय नमः ॥
ॐ गिरीशाय नमः ॥(६०)
ॐ गिरिशाय नमः ॥
ॐ अनघाय नमः ॥
ॐ भुजङ्गभूषणाय नमः ॥
ॐ भर्गाय नमः ॥
ॐ गिरिधन्विने नमः ॥
ॐ गिरिप्रियाय नमः ॥
ॐ कृत्तिवाससे नमः ॥
ॐ पुरारातये नमः ॥
ॐ भगवते नमः ॥
ॐ प्रमथाधिपाय नमः ॥(७०)
ॐ मृत्युञ्जयाय नमः ॥
ॐ सूक्ष्मतनवे नमः ॥
ॐ जगद्व्यापिने नमः ॥
ॐ जगद्गुरवे नमः ॥
ॐ व्योमकेशाय नमः ॥
ॐ महासेनजनकाय नमः ॥
ॐ चारुविक्रमाय नमः ॥
ॐ रुद्राय नमः ॥
ॐ भूतपतये नमः ॥
ॐ स्थाणवे नमः ॥ (८०)
ॐ अहिर्बुध्न्याय नमः ॥
ॐ दिगम्बराय नमः ॥
ॐ अष्टमूर्तये नमः ॥
ॐ अनेकात्मने नमः ॥
ॐ सात्त्विकाय नमः ॥
ॐ शुद्धविग्रहाय नमः ॥
ॐ शाश्वताय नमः ॥
ॐ खण्डपरशवे नमः ॥
ॐ अजाय नमः ॥
ॐ पाशविमोचकाय नमः ॥(९०)
ॐ मृडाय नमः ॥
ॐ पशुपतये नमः ॥
ॐ देवाय नमः ॥
ॐ महादेवाय नमः ॥
ॐ अव्ययाय नमः ॥
ॐ हरये नमः ॥
ॐ पूषदन्तभिदे नमः ॥
ॐ अव्यग्राय नमः ॥
ॐ दक्षाध्वरहराय नमः ॥
ॐ हराय नमः ॥ (१००)
ॐ भगनेत्रभिदे नमः ॥
ॐ अव्यक्ताय नमः ॥
ॐ सहस्राक्षाय नमः ॥
ॐ सहस्रपदे नमः ॥
ॐ अपवर्गप्रदाय नमः ॥
ॐ अनन्ताय नमः ॥
ॐ तारकाय नमः ॥
ॐ परमेश्वराय नमः ॥ (१०८)

## अष्टपुष्पाणि

ॐ शर्वाय क्षितिमूर्तये नमः ॥
ॐ भवाय जलमूर्तये नमः ॥
ॐ रुद्राय अग्निमूर्तये नमः ॥
ॐ उग्राय वायुमूर्तये नमः ॥
ॐ भीमाय आकाशमूर्तये नमः ॥
ॐ ईशानाय सूर्यमूर्तये नमः ॥
ॐ महादेवाय सोममूर्तये नमः ॥
ॐ पशुपतये यजमानमूर्तये नमः ॥

**धूपम् :-**

धराधरसुतानाथ धूर्जटे धवलप्रभ।
धूपमाघ्रापयामीश दशाङ्गं गुग्गुलान्वितम्॥
*ॐ श्री भवानीशङ्कराय नमः । धूपम् आघ्रापयामि ॥*

Wave agarabattī gently while ringing bell with left hand

**दीपम् :-**

साज्यवर्तियुतं दीपं सर्वमङ्गलकारकम्।
समर्पयामि पश्येदं सोमसूर्याग्निलोचन॥
*ॐ श्री भवानीशङ्कराय नमः । दीपं दर्शयामि ॥*

Wave ghee - dīpa gently while ringing bell with left hand.
Put it out immediately

**नैवेद्यम् -**

Say हस्तौ प्रक्षाल्य नैवेद्यं पुरतः स्थाप्य,
गायत्र्या सम्प्रोक्ष्य तुलसीदलैः आच्छाद्य – नैवेद्यम्

1) Wash hand. With Right Ring Finger (अनामिका) using गन्ध, draw a 卐 (swastika) in front of Pādukā-s. After washing hand once more, place the नैवेद्यवाटी on it.
2) Place 7 to 8 तुलसीदल in the right palm.
3) Wash these with अभिमन्त्रित water
4) Holding तुलसीदल in right hand, place left hand over it and make धेनुमुद्रा. Hold धेनुमुद्रा over नैवेद्यम् moving wrists gently in a circular clockwise motion while chanting the Rudra Gāyatrī Mantra - तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात्॥
5) Let some water fall on the नैवेद्य

6) Place one तुलसीदल on नैवेद्य. Then out of the remaining तुलसीदल, take one दल at a time between Thumb, Madhyamā & Anāmikā of the Right hand, wave over नैवेद्य and offer to the Pāduka-s chanting the following one by one ॐ प्राणाय स्वाहा, ॐ अपानाय स्वाहा, ॐ व्यानाय स्वाहा, ॐ उदानाय स्वाहा, ॐ समानाय स्वाहा. Then say - ॐ प्राणापानव्यानउदानसमाना: showing correct Mudrā-s, waving right hand from नैवेद्य towards the Pādukā-s.

7) Say - ॐ श्री भवानीशङ्कराय नमः

8) आचमनीयं समर्पयामि - Pour one spoon water in तीर्थपात्रम्
पूर्वापोषणं समर्पयामि - Pour one spoon water on नैवेद्यम्

9) Do Namaskāra and Chant नैवेद्यम् –

नैवेद्यं षड्रसोपेतं विषाशन घृतान्वितम् ।
मधुक्षीरापूपयुक्तं गृह्यतां सोमशेखर ।।

10) Say - ॐ श्री भवानीशङ्कराय नमः ।

नानाऋतुफलानि च समर्पयामि ।।

11) Sit with eyes closed for a minute, then ring the bell once.

12) Say- आचमनीयं समर्पयामि -Offer one spoon water in तीर्थपात्रम्
उत्तरापोषणं समर्पयामि - Offer one spoon water on नैवेद्यम्
मुखप्रक्षालनं समर्पयामि - Offer one spoon water in तीर्थपात्रम्
हस्तप्रक्षालनं समर्पयामि - Offer one spoon water in तीर्थपात्रम्
करोद्वर्तनार्थे चन्दनं समर्पयामि - Apply gandha on both Anāmikā-s (Ring fingers), cross wrists (Right on top) and sprinkle the gandha on Pādukā-s.

**ताम्बूलम् -**

नागवल्लीदलैः पूगैः नानाचूर्णैश्च संयुतम्।
नागेन्द्रहार ताम्बूलं मुखामोदं च गृह्यताम्॥

*ॐ श्री भवानीशङ्कराय नमः । मुखशुद्ध्यर्थं ताम्बूलं समर्पयामि ॥*

(Offer one spoon water on ताम्बूलम्)

**दक्षिणा -**

धनदाधिप देवेश दक्षिणाद्रव्यमुत्तमम्।
यथाशक्ति मया दत्तं गृह्यतां वृषभध्वज॥

*ॐ श्री भवानीशङ्कराय नमः । सांगतासिध्द्यर्थं हिण्यगर्भदक्षिणां समर्पयामि ॥*

(Offer one spoon water on दक्षिणा)

**नीराजनम् -**

Light नीलाञ्जन & कर्पूर for आरती. Ring the bell with left hand while doing ārati.

वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम्।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्॥

शान्तं पद्मासनस्थं शशधरमुकुटं पञ्चवक्त्रं त्रिनेत्रं
शूलं वज्रं च खड्गं परशुमभयदं दक्षिणाङ्गे वहन्तम्।
नागं पाशं च घण्टां डमरुकसहितं साङ्कुशं वामभागे
नानालङ्कारदीप्तं स्फटिकमणिनिभं पार्वतीशं नमामि॥

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम्।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि॥

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देव देव ॥
नीराजनं निर्मलदीप्तिमद्भि
र्दीपांकुरैरुज्ज्वलमुच्छ्रितैश्च।
घण्टानिनादेन समर्पयामि
मृत्युञ्जयाय त्रिपुरान्तकाय ॥

Keep bell down, show āratī to it once.
Hold āratī in left hand

**जल - आरती -**

Hold Āratī in Left hand. With Right hand do the jalāratī with Shaṅkha or spoon of water. Pour water in tīrthapātra.
Do not chant jalāratī shloka.

Say ॐ श्री भवानीशङ्कराय नमः। नीराजनं दर्शयामि तदन्ते जलारार्तिकं समर्पयामि ॥ (Wave right hand over āratī towards Pādukā-s)

Chant देवाभिवन्दनं (Wave hand over Āratī towards Pādukā-s)
आत्माभिवन्दनं (Wave hand over Āratī towards self)

**मन्त्रपुष्पाञ्जलिः :-**

Wash both hands after taking Āratī

(Hold both palms full of flowers, akshata, offer with both hands when Shloka is over)

हर विश्वाखिलाधार निराधार निराश्रय।
पुष्पाञ्जलिं गृहाणेश सोमेश्वर नमोऽस्तु ते ॥

*ॐ श्री भवानीशङ्कराय नमः। मंत्रपुष्पाञ्जलिं समर्पयामि ॥*

(Offer flowers with both palms)

**प्रदक्षिणा** – नमस्कार मुद्रा with folded hands at chest level. Move only wrists. 3 times in clockwise direction.

पदे पदे दुरितघ्नं मायाभ्रमणवारकम् ।
पुरारे तव प्रीत्यर्थं प्रदक्षिणशतं मम ॥
*ॐ श्री भवानीशङ्कराय नमः । प्रदक्षिणां समर्पयामि ॥*

**प्रार्थना** – (With नमस्कारमुद्रा)

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात् कारुण्यभावेन रक्ष मां परमेश्वर ॥
*ॐ श्री भवानीशङ्कराय नमः । प्रार्थनां समर्पयामि ॥*

**नमस्कार :-** (With नमस्कारमुद्रा)

मृत्युञ्जयाय रुद्राय नीलकण्ठाय, शम्भवे ।
अमृतेशाय शर्वाय महादेवाय ते नमः ॥
*ॐ श्री भवानीशङ्कराय नमः । नमस्करोमि ॥*

**विशेषार्घ्यम्** – Take a spoon of Abhimantrita water with गन्धाक्षतपुष्प in it. hold in Right hand, show to the deity, pour in तीर्थपात्र after chanting shloka

वरद त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ।
अनेन सफलार्घ्येन फलदोऽस्तु सदा मम ॥
*ॐ श्री भवानीशङ्कराय नमः । विशेषार्घ्यं समर्पयामि ॥*

**प्रार्थनापूर्वक क्षमापनम्** –(नमस्कार मुद्रा)

आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षमस्व परमेश्वर ॥
क्षमस्व देवदेवेश क्षमस्व भुवनेश्वर ।
तव पादाम्बुजे नित्यं निश्चला भक्तिरस्तु मे ॥
*ॐ श्री भवानीशङ्कराय नमः ।*
*प्रार्थनापूर्वकं क्षमापनं समर्पयामि ॥*

**समर्पणम्** - 1) Hold spoon of water in Left hand;
2) Hold तुलसीदल in Right hand over tīrthapātra in front of the Pādukā-s
3) Chant Shloka.

सर्वं सदाशिव सहस्व ममापराधं
मग्नं समुद्धर महत्यमुमापदब्धौ ।।
सर्वात्मना तव पदाम्बुजमेव दीनः
स्वामिन् अनन्यशरणः शरणं गतोऽस्मि ।।
गतं पापं गतं दुःखं गतं दारिद्र्यमेव च ।
आगता सुखसम्पत्तिः पुण्याश्च तव दर्शनात्।।
देवो दाता च भोक्ता च देवरूपमिदं जगत् ।
देवो जयति सर्वत्र यो देवः सोऽहमेव हि ।।
अनेन कृतपूजाकर्मणा श्री भवानीशङ्करो महारुद्रः प्रीयताम् ।।
ॐ तत् सत् ब्रह्मार्पणमस्तु ।।

When saying this pour water on तुलसीदल offer it to Pādukā-s

Do Japa of Ishtamantra for 3 minutes

During सामूहिक पूजन 1) Chant only विनियोग mentally
2) Don't do न्यास to avoid confusion for those who have not been given nyāsa

After इष्टमन्त्र जप, offer जप to इष्टदेव/देवी chanting appropriate

**अर्पण मन्त्र-** मन्त्र from the following:-

देवी श्लोक (१) गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ।।

देव श्लोक (२) गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्
सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ।।

**विसर्जन मन्त्र** - When chanting this shloka touch Pādukā-s with Right अनामिका and मध्यमा, Then touch अनाहत (own heart) when saying "मे हृदि")

तिष्ठ तिष्ठ परस्थाने स्वस्थाने परमेश्वर,
यत्र ब्रह्मादयो देवाः सर्वे तिष्ठन्ति मे हृदि ।।
ॐ नमः पार्वतीपतये हर हर महादेव ।।

(Chant the सभा-समाप्ति-प्रार्थना Page No. 1)

## SHRĪ DEVĪ PŪJANAM

## श्रीदेवीपूजनम्

**ध्यानम्** - Namaskāra Mudrā

विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ।
हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं
बिभ्राणाम् अनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥ १ ॥

सिन्दूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्-
तारानायकशेखरां स्मितमुखीम् आपीनवक्षोरुहाम् ।
पाणिभ्याम् अलिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्नघटस्थरक्तचरणां ध्यायेत् पराम् अम्बिकाम् ॥ २ ॥

सकुङ्कुमविलेपनाम् अलिकचुम्बिकस्तूरिकां
समन्दहसितेक्षणां सशरचापपाशाङ्कुशाम् ।
अशेषजनमोहिनीम् अरुणमाल्यभूषाम्बरां
जपाकुसुमभासुरां जपविधौ स्मरेद् अम्बिकाम् ॥ ३ ॥

*ॐ श्रीमात्रे नमः । ध्यानं समर्पयामि ॥* (Offer 1 Flower)

**आवाहनम्** -

महापद्मवनान्तस्थे कारणानन्दविग्रहे ।
सर्वभूतहिते मातरेह्येहि परमेश्वरि ॥

*ॐ श्रीमात्रे नमः । आवाहनं समर्पयामि ॥* (Offer अक्षताः)

**आसनम्** -

सदाशिवाङ्क संस्थाने सर्वाधारे महेश्वरि ।
सर्वतत्त्वमयं दिव्यमासनं प्रतिगृह्यताम् ॥

*ॐ श्रीमात्रे नमः । आसनार्थे पुष्पं समर्पयामि ॥*

Offer a flower

**पाद्यम् -**

पाद्यमाद्यन्तशून्यायै वेद्यायै वेदवादिभिः ।
तुभ्यं दास्यामि पद्माक्षि सुगन्धिं निर्मलं जलम् ॥
*ॐ श्रीमात्रे नमः । पादयोः पाद्यं समर्पयामि ॥*
(Offer 2 spoons अभिमन्त्रित water on Pādukā-s)

**अर्घ्यम् -**

अघहीने गृहाणेदमर्घ्यमष्टाङ्गसंयुतम् ।
अम्बाखिलानां जगतामम्बुजासन - वन्दिते ॥
*ॐ श्रीमात्रे नमः । हस्तयोरर्घ्यं समर्पयामि ॥*
(Offer one spoon अभिमन्त्रित water with gandha, akshata, flowers in it)

**आचमनम् -**

गङ्गातोयं समानीतं सुवर्णकलशे स्थितम् ।
आचम्यतां महाभागे भवानि भवभामिनि ॥
*ॐ श्रीमात्रे नमः । आचमनीयं जलं समर्पयामि ॥*
(Offer 3 spoons अभिमन्त्रित water to Pādukā-s
Offer one spoon in तीर्थपात्र)

**स्नानम्** - (Remove all निर्माल्य carefully and put in तीर्थपात्र before doing अभिषेक with water from तट्टे. chant Shloka)

साध्वीनामग्रतोगण्ये साधुसङ्घ समादृते ।
सर्वतीर्थमयं तोयं स्नानार्थं प्रतिगृह्यताम् ॥
*ॐ श्रीमात्रे नमः । स्नानीयं जलं समर्पयामि ॥*
तदन्ते आचमनीयं जलं समर्पयामि
Offer one spoon of water in tīrthapātra

1) Hold पादुका in Napkin with Left hand
2) Do self प्रोक्षण with Right hand with the water from Somasūtra
3) Remove Somasūtra
4) Place decorated plate on the stool.
5) Wipe Pādukā-s, Apply little गन्ध and place it in decorated plate

**वस्त्रम् -**

दुकूलद्वितयं दिव्यं कञ्चुकं च मनोहरम्।
देवदेवि गृहाणेदं दिगम्बरशिवप्रिये ॥
*ॐ श्रीमात्रे नमः । वस्त्रोपवस्त्रं समर्पयामि ॥*

Offer अक्षताः to Pādukā-s | *तदन्ते आचमनीयं जलं समर्पयामि ॥*
Then offer 1 spoon water into tīrthapātra

**यज्ञोपवीतम् -**

उपवीतं गृहाणेदं उपमाशून्यवैभवे ।
उमाहैमवति प्रीत्या हेमसूत्रसमन्वितम् ॥
*ॐ श्रीमात्रे नमः । यज्ञोपवीतं समर्पयामि ॥*
Offer अक्षताः । *तदन्ते आचमनीयं जलं समर्पयामि ॥*
offer 1 spoon water into tīrthapātra

**आभूषणम् -**

माङ्गल्यमणिसंयुक्त-मुक्ताफलसमन्वितम्।
दत्तं मङ्गलसूत्रं ते गृहाणाम्ब शुभं कुरु ॥
*ॐ श्रीमात्रे नमः । नानालङ्काराणि समर्पयामि ॥*

Offer अक्षताः

**गन्धः -**

कर्पूरागरुसंयुक्तं कपालिप्राणनायिके।
कस्तूरीतिलकं गन्धं सर्वाङ्गे प्रतिगृह्यताम् ॥
*ॐ श्रीमात्रे नमः । श्रीगन्धं समर्पयामि ॥*

Offer a small ball of gandha with anāmikā,madhyamā & thumb

**अक्षताः -**

अक्षतान् धवलान् देवि शालीयांस्तण्डुलान् शुभान्।
हरिद्राकुङ्कुमोपेतान् गृहाणाम्ब कृपानिधे॥
*ॐ श्रीमात्रे नमः । अक्षतान् समर्पयामि ॥*

Offer akshata

**पुष्पम् -** पद्मशङ्खजपापुष्पैः पारिजातैश्च चम्पकैः ।
पूजयामि प्रसीद त्वं पद्माक्षि भुवनेश्वरि ॥
*ॐ श्रीमात्रे नमः । पुष्पाणि समर्पयामि ॥*

Offer flowers

**सौभाग्यद्रव्यम् -**

कज्जलं चैव सिन्दूरं हरिद्राकुङ्कुमानि च ।
भक्त्यार्पितानि श्रीमातः सौभाग्यानि च स्वीकुरु ॥
*ॐ श्रीमात्रे नमः । सौभाग्यद्रव्याणि समर्पयामि ॥*

Offer Haldi - Kuṅkuma with anāmikā, madhyamā and thumb of right hand

(Say श्रीदुर्गा अष्टोत्तर शतनामावल्या सहित कुङ्कुमार्चने विनियोगः)

Offer a pinch of Kuṅkuma to the Pādukā-s while chanting each name

# श्रीदुर्गाष्टोत्तरशतनामावलिः

ॐ माहेश्वर्यै नमः ।
ॐ महादेव्यै नमः ।
ॐ जयन्त्यै नमः ।
ॐ सर्वमङ्गलायै नमः ।
ॐ लज्जायै नमः ।
ॐ भगवत्यै नमः ।
ॐ वन्द्यायै नमः ।
ॐ भवान्यै नमः ।
ॐ पापनाशिन्यै नमः ।
ॐ चण्डिकायै नमः । (१०)
ॐ कालरात्र्यै नमः ।
ॐ भद्रकाल्यै नमः ।
ॐ अपराजितायै नमः ।
ॐ महाविद्यायै नमः ।
ॐ महामेधायै नमः ।
ॐ महामायायै नमः ।
ॐ महाबलायै नमः ।
ॐ कात्यायन्यै नमः ।
ॐ जयायै नमः ।
ॐ दुर्गायै नमः । (२०)
ॐ मन्दारवनवासिन्यै नमः ।
ॐ आर्यायै नमः ।
ॐ गिरिसुतायै नमः ।
ॐ धात्र्यै नमः ।
ॐ महिषासुरघातिन्यै नमः ।
ॐ सिद्धिदायै नमः ।

ॐ बुद्धिदायै नमः।
ॐ नित्यायै नमः।
ॐ वरदायै नमः।
ॐ वरवर्णिन्यै नमः। (३०)
ॐ अम्बिकायै नमः।
ॐ सुखदायै नमः।
ॐ सौम्यायै नमः।
ॐ जगन्मात्रे नमः।
ॐ शिवप्रियायै नमः।
ॐ भक्तसन्तापसंहर्त्र्यै नमः।
ॐ सर्वकामप्रपूरिण्यै नमः।
ॐ जगत्कर्त्र्यै नमः।
ॐ जगद्धात्र्यै नमः।
ॐ जगत्पालनतत्परायै नमः। (४०)
ॐ अव्यक्तायै नमः।
ॐ व्यक्तरूपायै नमः।
ॐ भीमायै नमः।
ॐ त्रिपुरसुन्दर्यै नमः। (४०)
ॐ अपर्णायै नमः।
ॐ ललितायै नमः।
ॐ वेद्यायै नमः।
ॐ पूर्णचन्द्रनिभाननायै नमः।
ॐ चामुण्डायै नमः।
ॐ चतुरायै नमः। (५०)
ॐ चन्द्रायै नमः।
ॐ गुणत्रयविभाविन्यै नमः।
ॐ हेरम्बजनन्यै नमः।
ॐ काल्यै नमः।
ॐ त्रिगुणायै नमः।
ॐ यशोधारिण्यै नमः।
ॐ उमायै नमः।
ॐ कलशहस्तायै नमः।
ॐ दैत्यदर्पनिषूदिन्यै नमः।
ॐ बुद्ध्यै नमः। (६०)
ॐ कान्त्यै नमः।
ॐ क्षमायै नमः।
ॐ शान्त्यै नमः।
ॐ पुष्ट्यै नमः।
ॐ तुष्ट्यै नमः।
ॐ धृत्यै नमः।
ॐ मत्यै नमः।
ॐ वरायुधधरायै नमः।
ॐ धीरायै नमः।
ॐ गौर्यै नमः। (७०)
ॐ शाकम्भर्यै नमः।
ॐ शिवायै नमः।
ॐ अष्टसिद्धिप्रदायै नमः।
ॐ वामायै नमः।
ॐ शिववामाङ्गवासिन्यै नमः।
ॐ धर्मदायै नमः।
ॐ धनदायै नमः।
ॐ श्रीदायै नमः।
ॐ कामदायै नमः।
ॐ मोक्षदायै नमः।(८०)

ॐ अपरायै नमः।
ॐ चित्स्वरूपायै नमः।
ॐ चिदानन्दायै नमः।
ॐ जयश्रियै नमः।
ॐ जयदायिन्यै नमः।
ॐ सर्वमङ्गलमाङ्गल्यायै नमः।
ॐ जगत्त्रयहितैषिण्यै नमः।
ॐ शर्वाण्यै नमः।
ॐ पार्वत्यै नमः।
ॐ धन्यायै नमः। (९०)
ॐ स्कन्दमात्रे नमः।
ॐ अखिलेश्वर्यै नमः।
ॐ प्रपन्नार्तिहरायै नमः।
ॐ देव्यै नमः।
ॐ सुभगायै नमः।
ॐ कामरूपिण्यै नमः।
ॐ निराकारायै नमः।
ॐ साकारायै नमः।
ॐ महाकाल्यै नमः।
ॐ सुरेश्वर्यै नमः। (१००)
ॐ श्रद्धायै नमः।
ॐ ध्रुवायै नमः।
ॐ कृत्यायै नमः।
ॐ मृडान्यै नमः।
ॐ भक्तवत्सलायै नमः।
ॐ सर्वशक्तिसमायुक्तायै नमः।
ॐ शरण्यायै नमः।
ॐ सर्वकामदायै नमः। (१०८)

**धूपः :-** धूपं ददामि ते रम्यं गुग्गुलागरुमिश्रितम्।
गृहाणेदं महादेवि भक्तानामिष्टदायिनि॥
*ॐ श्रीमात्रे नमः। धूपम् आघ्रापयामि॥*

Gently wave the agarabatti with the right hand
while ringing the bell with the left hand

**दीपः :-** आज्यवर्तियुतं दीपं नगेन्द्रकुलदीपिके।
अम्ब पश्य मया दत्तं अन्तर्ध्वान्तापहारिणि॥
*ॐ श्रीमात्रे नमः। दीपं दर्शयामि॥*

Gently wave ghee dīpa with the right hand while
ringing the bell with the left hand. Put it out immediately

**नैवेद्यम् -**

Say हस्तौ प्रक्षाल्य नैवेद्यं पुरतः स्थाप्य,
गायत्र्या सम्प्रोक्ष्य तुलसीदलैः आच्छाद्य नैवेद्यम्

1) Wash hand. With Right Ring Finger (अनामिका) using गन्ध, draw a 卐 (swastika) in front of Pādukā-s. After washing hand once more, place the नैवेद्यवाटी on it.
2) Place 7 to 8 तुलसीदल in the right palm.
3) Wash these with अभिमन्त्रित water
4) Holding तुलसीदल in right hand, place left hand over it and make धेनुमुद्रा. Hold धेनुमुद्रा over नैवेद्यम् moving wrists gently in a circular clockwise motion while chanting the Devī Gāyatrī Mantra - कात्यायन्याय विद्महे कन्याकुमारि धीमहि ।

तन्नो दुर्गिः प्रचोदयात् ॥

5) Let some water fall on the नैवेद्य
6) Place one तुलसीदल on नैवेद्य. Then out of the remaining तुलसीदल, take one दल at a time between Thumb, Madhyamā & Anāmikā of the Right hand, wave over नैवेद्य and offer to the Pādukā-s chanting the following one by one ॐ प्राणाय स्वाहा, ॐ अपानाय स्वाहा, ॐ व्यानाय स्वाहा, ॐ उदानाय स्वाहा, ॐ समानाय स्वाहा. Then say - ॐ प्राणापानव्यानउदानसमानाः showing correct Mudrā-s, waving right hand from नैवेद्य towards the Pādukā-s.
7) Say - ॐ श्री मात्रे नमः
8) आचमनीयं समर्पयामि - Pour one spoon water in तीर्थपात्रम्
पूर्वापोषणं समर्पयामि - Pour one spoon water on नैवेद्यम्
9) Do Namaskāra and Chant नैवेद्यम् –

नानाविधानि भक्ष्याणि व्यञ्जनानि हरप्रिये ।
यथेष्टं भुङ्क्ष्व नैवेद्यं षड्रसं च चतुर्विधम् ॥

10) Say - ॐ श्री मात्रे नमः । नैवेद्यं निवेदयामि ।

नानाऋतुफलानि च समर्पयामि ॥

11) Sit with eyes closed for a minute, then ring the bell once.

12) Say- आचमनीयं समर्पयामि - Offer one spoon water in तीर्थपात्रम्

उत्तरापोषणं समर्पयामि - Offer one spoon water on नैवेद्यम्

मुखप्रक्षालनं समर्पयामि - Offer one spoon water in तीर्थपात्रम्

हस्तप्रक्षालनं समर्पयामि - Offer one spoon water in तीर्थपात्रम्

करोद्वर्तनार्थे चन्दनं समर्पयामि - Apply gandha on both Anāmikā-s (Ring fingers), cross wrists (Right on top) and sprinkle the gandha on Pādukā-s.

**ताम्बूलम्** - ताम्बूलं मुक्तिकाचूर्णकर्पूरादिसमन्वितम् ।
जिह्वाजाड्योच्छेदकरं त्रिपुरे प्रतिगृह्यताम् ॥
*ॐ श्रीमात्रे नमः । मुखशुध्द्यर्थं ताम्बूलं समर्पयामि॥*
(Offer one spoon water on Pān-Suparī)

**दक्षिणा** - पूजापूर्णत्वसिद्ध्यर्थं पूर्णे पूर्णफलप्रदे ।
हेमरत्नमयीं द्रव्यदक्षिणां स्वीकुरुष्व मे ॥
*ॐ श्रीमात्रे नमः । हिरण्यगर्भदक्षिणां समर्पयामि ॥*
(Offer one spoon water on Dakshīṇā)

**नीराजनम्** - (Wave āratī with right hand while ringing bell with left hand)

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥
त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव ॥

माया कुण्डलिनी क्रिया मधुमती काली कलामालिनी
मातङ्गी विजया जया भगवती देवी शिवा शाम्भवी ।
शक्तिः शङ्करवल्लभा त्रिनयना वाग्वादिनी भैरवी
ह्रींकारी त्रिपुरा परात्परमयी माता कुमारीत्यसि ॥

अन्तस्तेजो बहिस्तेजः एकीकृत्यामितप्रभम् ।
त्रिधा देवि परिभ्राम्य नीराजनं निवेदये ॥
समस्तचक्रचक्रेशीयुते देवि नवात्मिके ।
आरार्तिकं मया दत्तं गृहाणाशेषसिद्धये ॥
*ॐ श्रीमात्रे नमः । नीराजनं दर्शयामि ॥*

After Āratī is over keep घाण्टी down, do Āratī to it once;
Do जलारती once with Shankha or spoon of अभिमन्त्रित water, to the Pādukā-s

Pour water in तीर्थपात्र.

After जलारती is over,Chant ॐ श्री मात्रे नमः । नीराजनं दर्शयामि तदन्ते जलारार्तिकं समर्पयामि ॥

Chant देवाभिवन्दनं (Wave hand over Āratī towards Pādukā-s)
आत्माभिवन्दनं (Wave hand over Āratī towards self)

**मन्त्रपुष्पाञ्जलि :-**

Wash both hands after taking Āratī

(Hold both palms full of flowers, akshata, offer with both hands when Shloka is over)

पुष्पाञ्जलिं गृहाणेमं परब्रह्मस्वरूपिणि ।
भक्त्या समर्पितं देवि प्रसन्ना भव सर्वदा ॥
*ॐ श्रीमात्रे नमः । मन्त्रपुष्पाञ्जलिं समर्पयामि ॥*

**प्रदक्षिणा** - Namaskāra Mudrā, Hold hands at chest level, move wrists 3 times in clockwise direction)

सर्वमङ्गललाभाय सर्वपापनिवृत्तये ।
प्रदक्षिणां करोम्यम्ब प्रसीद परमेश्वरि ॥
*ॐ श्रीमात्रे नमः । प्रदक्षिणां समर्पयामि ॥*

**प्रार्थना** – (Hold hands in namaskāra mudrā)

चरणकमलयुग्मं पङ्कजैः पूजयित्वा
कनककमलमालां कण्ठदेशेऽर्पयित्वा ।
शिरसि विनिहितोऽयं रक्तपुष्पाञ्जलिस्ते
हृदयकमलमध्ये देवि हर्षं तनोतु ।। हृदयकमलमध्ये देवि हर्षं तनोतु ।।
*ॐ श्रीमात्रे नमः । प्रार्थनां समर्पयामि ।।*

**नमस्कारः** – (Hold hands in namaskāra mudrā)

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ।।
*ॐ श्रीमात्रे नमः । नमस्करोमि ।।*

**विशेषार्घ्यम् -**

(Hold spoon of Abhimantrita water with गन्धाक्षतपुष्प in it ready, with right hand Show it to the deity, and pour in Tīrthapātra after Shloka is over)

कामेश्वरि जगन्मातः सच्चिदानन्दविग्रहे ।
गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि ।।
*ॐ श्रीमात्रे नमः । विशेषार्घ्यं समर्पयामि ।।*

**प्रार्थनापूर्वकं क्षमापनम्** – Namaskāra Mudrā

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ।।
अपराधो भवत्येव सेवकस्य पदे पदे ।
कोऽपरः सहते लोके केवलं मातरं विना ।।
*ॐ श्रीमात्रे नमः । प्रार्थनापूर्वकं क्षमां याचे ।*

**समर्पणम्** - 1) Hold spoon of water in Left hand;

2) Hold तुलसीदल in Right hand in front of Pādukā-s, over तीर्थपात्र

3) Chant Shloka

जपो जल्पश्शिल्पं सकलमपि मुद्राविरचना
गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः ।
प्रणामस्संवेशस्सुखमखिलमात्मार्पणदृशा
सपर्यापर्यायस्तव भवतु यन्मे विलसितम् ॥
अनेन कृतेन पूजाराधनाकर्मणा श्रीजगदम्बा परासंवित्
स्वरूपिणी प्रीयताम् ॥
*ॐ तत् सत् ब्रह्मार्पणमस्तु । श्री जगदम्बार्पणमस्तु ॥*

When saying this pour water on Tulasīdala and offer it to the Pādukā-s

Do इष्टमन्त्र जप for 3 minutes (During Sāmūhika Pūjan, No न्यास should be done to avoid confusion for those who have not received nyāsa. विनियोग should be done mentally)

After इष्टमन्त्र जप, offer जप to इष्टदेव/देवी chanting appropriate मन्त्र from the following:-

**अर्पण मन्त्र-**

देवी श्लोक (१) गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥

देव श्लोक (२) गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्
सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥

**विसर्जन मन्त्र** - When chanting this shloka touch Pādukā-s with Right अनामिका and मध्यमा, Then touch अनाहत (own heart) when saying "मे हृदि")

तिष्ठ तिष्ठ परस्थाने स्वस्थाने परमेश्वरि,
यत्र ब्रह्मादयो देवाः सर्वे तिष्ठन्ति मे हृदि ॥

ॐ नमः पार्वतीपतये हर हर महादेव ॥

(Chant the सभा-समाप्ति-प्रार्थना Page No. 1)



# नवरात्रि नित्यपाठः

## देव्याः कवचम्

ॐ अस्य श्रीचण्डीकवचस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, चामुण्डा देवता, अङ्गन्यासोक्तमातरो बीजम्, दिग्बन्धदेवतास्तत्त्वम्, श्रीजगदम्बाप्रीत्यर्थे जपे विनियोगः।

ॐ नमश्चण्डिकायै॥

मार्कण्डेय उवाच।

ॐ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम्।
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥१॥

ब्रह्मोवाच।

अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम्।
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥२॥

प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी।
तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम् ॥३॥

पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च।
सप्तमं कालरात्रीति महागौरीति चाष्टमम् ॥४॥

नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः।
उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥५॥

अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे।
विषमे दुर्गमे चैव भयार्ताः शरणं गताः ॥६॥

न तेषां जायते किञ्चिदशुभं रणसङ्कटे।
नापदं तस्य पश्यामि शोकदुःखभयं न हि ॥७॥

यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः प्रजायते।
ये त्वां स्मरन्ति देवेशि रक्षसे तान्न संशयः ॥८॥

प्रेतसंस्था तु चामुण्डा वाराही महिषासना।
ऐन्द्री गजसमारूढा वैष्णवी गरुडासना ॥९॥

माहेश्वरी वृषारूढा कौमारी शिखिवाहना।
लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ॥१०॥

श्वेतरूपधरा देवी ईश्वरी वृषवाहना।
ब्राह्मी हंससमारूढा सर्वाभरणभूषिता ॥११॥

इत्येता मातरः सर्वाः सर्वयोगसमन्विताः।
नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥१२॥

दृश्यन्ते रथमारूढा देव्यः क्रोधसमाकुलाः।
शङ्खं चक्रं गदां शक्तिं हलं च मुसलायुधम् ॥१३॥

खेटकं तोमरं चैव परशुं पाशमेव च।
कुन्तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम् ॥१४॥

दैत्यानां देहनाशाय भक्तानामभयाय च।
धारयन्त्यायुधानीत्थं देवानां च हिताय वै ॥१५॥

नमस्तेऽस्तु महारौद्रे महाघोरपराक्रमे।
महाबले महोत्साहे महाभयविनाशिनि ॥१६॥

त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्धिनि।
प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता ॥१७॥

दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्गधारिणी।
प्रतीच्यां वारुणी रक्षेद् वायव्यां मृगवाहिनी ॥१८॥

उदीच्यां पातु कौमारी ऐशान्यां शूलधारिणी।
ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद् वैष्णवी तथा ॥१९॥

एवं दश दिशो रक्षेच्चामुण्डा शववाहना।
जया मे चाग्रतः पातु विजया पातु पृष्ठतः ॥२०॥

अजिता वामपार्श्वे तु दक्षिणे चापराजिता।
शिखामुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ॥२१॥

मालाधरी ललाटे च भ्रुवौ रक्षेद् यशस्विनी।
त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके ॥२२॥

शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी
कपोलौ कालिका रक्षेत्कर्णमूले तु शाङ्करी ॥२३॥

नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका।
अधरे चामृतकला जिह्वायां च सरस्वती ॥२४॥

दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका।
घण्टिकां चित्रघण्टा च महामाया च तालुके ॥२५॥

कामाक्षी चिबुकं रक्षेद् वाचं मे सर्वमङ्गला।
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥२६॥

नीलग्रीवा बहिःकण्ठे नलिकां नलकूबरी।
स्कन्धयोः खड्गिनी रक्षेद् बाहू मे वज्रधारिणी ॥२७॥

हस्तयोर्दण्डिनी रक्षेदम्बिका चाङ्गुलीषु च।
नखाञ्छूलेश्वरी रक्षेत्कुक्षौ रक्षेत्कुलेश्वरी ॥२८॥

स्तनौ रक्षेन्महादेवी मनःशोकविनाशिनी।
हृदये ललितादेवी उदरे शूलधारिणी ॥२९॥

नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा।
पूतना कामिका मेढ्रं गुदे महिषवाहिनी ॥३०॥

कट्यां भगवती रक्षेज्जानुनी विन्ध्यवासिनी।
जङ्घे महाबला रक्षेत्सर्वकामप्रदायिनी ॥३१॥

गुल्फयोर्नारसिंही च पादपृष्ठे तु तैजसी।
पादाङ्गुलीषु श्री रक्षेत्पादाधस्तलवासिनी ॥३२॥

नखान् दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी।
रोमकूपेषु कौबेरी त्वचं वागीश्वरी तथा ॥३३॥

रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती।
अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥३४॥

पद्मावती पद्मकोशे कफे चूडामणिस्तथा।
ज्वालामुखी नखज्वालामभेद्या सर्वसन्धिषु ॥३५॥

शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा।
अहङ्कारं मनो बुद्धिं रक्षेन्मे धर्मधारिणी ॥३६॥

प्राणापानौ तथा व्यानमुदानं च समानकम्।
वज्रहस्ता च मे रक्षेत्प्राणं कल्याणशोभना ॥३७॥

रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी।
सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥३८॥

आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी।
यशः कीर्तिं च लक्ष्मीं च धनं विद्यां च चक्रिणी॥३९॥

गोत्रमिन्द्राणि मे रक्षेत्पशून्मे रक्ष चण्डिके।
पुत्रान् रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी ॥४०॥

पन्थानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा।
राजद्वारे महालक्ष्मीर्विजया सर्वतः स्थिता ॥४१॥

रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु।
तत्सर्वं रक्ष मे देवि जयन्ती पापनाशिनी ॥४२॥

पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः।
कवचेनावृतो नित्यं यत्र यत्रैव गच्छति ॥४३॥

तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः।
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम्।
परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् ॥४४॥

निर्भयो जायते मर्त्यः सङ्ग्रामेष्वपराजितः।
त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतः पुमान् ॥४५॥

इदं तु देव्याः कवचं देवानामपि दुर्लभम्।
यः पठेत्प्रयतो नित्यं त्रिसन्ध्यं श्रध्दयान्वितः ॥४६॥

दैवी कला भवेत्तस्य त्रैलोक्येष्वपराजितः।
जीवेद् वर्षशतं साग्रमपमृत्युविवर्जितः ॥४७॥

नश्यन्ति व्याधयः सर्वे लूताविस्फोटकादयः।
स्थावरं जङ्गमं चैव कृत्रिमं चापि यद्विषम् ॥४८॥

अभिचाराणि सर्वाणि मन्त्रयन्त्राणि भूतले।
भूचराः खेचराश्चैव जलजाश्चोपदेशिकाः ॥४९॥

सहजा कुलजा माला डाकिनी शाकिनी तथा।
अन्तरिक्षचरा घोरा डाकिन्यश्च महाबलाः ॥५०॥

ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः।
ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवादयः ॥५१॥

नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते।
मानोन्नतिर्भवेद् राज्ञस्तेजोवृद्धिकरं परम् ॥५२॥

यशसा वर्धते सोऽपि कीर्तिमण्डितभूतले।
जपेत्सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा ॥५३॥

यावद्भूमण्डलं धत्ते सशैलवनकाननम्।
तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्रपौत्रिकी ॥५४॥

देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम्।
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥५५॥

लभते परमं रूपं शिवेन सह मोदते॥ॐ॥ ॥५६॥

*॥ इति देव्याः कवचं सम्पूर्णम् ॥*

## अर्गलास्तोत्रम्

ॐ अस्य श्रीअर्गलास्तोत्रमन्त्रस्य विष्णुर्ऋषिः,अनुष्टुप् छन्दः,श्रीमहालक्ष्मीर्देवता, श्रीजगदम्बाप्रीतये जपे विनियोगः॥

ॐ नमश्चण्डिकायै॥

मार्कण्डेय उवाच।

ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते॥१॥

जय त्वं देवि चामुण्डे जय भूतार्तिहारिणि।
जय सर्वगते देवि कालरात्रि नमोऽस्तु ते ॥२॥

मधुकैटभविद्राविविधातृवरदे नमः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥३॥

महिषासुरनिर्णाशि भक्तानां सुखदे नमः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥४॥

रक्तबीजवधे देवि चण्डमुण्डविनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥५॥

शुम्भस्यैव निशुम्भस्य धूम्राक्षस्य च मर्दिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥६॥

वन्दिताङ्घ्रियुगे देवि सर्वसौभाग्यदायिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥७॥

अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥८॥

नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥९॥

स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१०॥

चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥११॥

देहि सौभाग्यमारोग्यं देहि मे परमं सुखम्।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१२॥

विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१३॥

विधेहि देवि कल्याणं विधेहि परमां श्रियम्।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१४॥

सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१५॥

विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१६॥

प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१७॥

चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१८॥

कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१९॥

हिमाचलसुतानाथसंस्तुते परमेश्वरि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२०॥

इन्द्राणीपतिसद्भावपूजिते परमेश्वरि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२१॥

देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२२॥

देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२३॥

पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम्।
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ॥२४॥

इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः।
स तु सप्तशतीसङ्ख्यावरमाप्नोति सम्पदाम्॥ॐ॥॥२५॥

*॥ इति देव्या अर्गलास्तोत्रं सम्पूर्णम् ॥*

# कीलकस्तोत्रम्

ॐ अस्य श्रीकीलकमन्त्रस्य शिवऋषिः, अनुष्टुप् छन्दः,
श्रीमहासरस्वतीदेवता, श्रीजगदम्बाप्रीत्यर्थं जपे विनियोगः।

ॐ नमश्चण्डिकायै ॥

मार्कण्डेय उवाच

ॐ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥१॥

सर्वमेतद्विजानीयान्मन्त्राणामभिकीलकम्।
सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः ॥२॥

सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि।
एतेन स्तुवतां देवी स्तोत्रमात्रेण सिद्ध्यति ॥३॥

न मन्त्रो नौषधं तत्र न किञ्चिदपि विद्यते।
विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकम् ॥४॥

समग्राण्यपि सिद्ध्यन्ति लोकशङ्कामिमां हरः।
कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम् ॥५॥

स्तोत्रं वै चण्डिकायास्तु तच्च गुप्तं चकार सः।
समाप्तिर्न च पुण्यस्य तां यथावन्नियन्त्रणाम् ॥६॥

सोऽपि क्षेममवाप्नोति सर्वमेवं न संशयः।
कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः ॥७॥

ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति।
इत्थं रूपेण कीलेन महादेवेन कीलितम् ॥८॥

यो निष्कीलां विधायैनां नित्यं जपति संस्फुटम्।
स सिद्धः स गणः सोऽपि गन्धर्वो जायते नरः ॥९॥

न चैवाप्यटतस्तस्य भयं क्वापीह जायते।
नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात् ॥१०॥

ज्ञात्वा प्रारभ्य कुर्वीत न कुर्वाणो विनश्यति।
ततो ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः ॥११॥

सौभाग्यादि च यत्किञ्चिद् दृश्यते ललनाजने।
तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभम् ॥१२॥

शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः।
भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ॥१३॥

ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः।
शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः ॥ॐ॥॥१४॥

*॥ इति देव्याः कीलकस्तोत्रं सम्पूर्णम् ॥*

## तन्त्रोक्तं रात्रिसूक्तम्

ॐ विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम्।
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥१॥

ब्रह्मोवाच

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका।
सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता ॥२॥

अर्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः।
त्वमेव सन्ध्या सावित्री त्वं देवि जननी परा ॥३॥

त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत्।
त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ॥४॥

विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने।
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ॥५॥

महाविद्या महामाया महामेधा महास्मृतिः।
महामोहा च भवती महादेवी महासुरी ॥६॥

प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥७॥

त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा।
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ॥८॥

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा।
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा ॥९॥

सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी।
परापराणां परमा त्वमेव परमेश्वरी ॥१०॥

यच्च किञ्चित् क्वचिद्वस्तु सदसद्वाखिलात्मिके।
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा॥११॥

यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत्।
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥१२॥

विष्णुः शरीरग्रहणमहमीशान एव च।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ॥१३॥

सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता।
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥१४॥

प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥१५॥

*॥ इति रात्रिसूक्तम्॥*

# महिषान्तकरीसूक्तम्

ॐ ऋषिरुवाच।

शक्रादयः सुरगणा निहतेऽतिवीर्ये
तस्मिन्दुरात्मनि सुरारिबले च देव्या।
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा
वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥१॥

देव्या यया ततमिदं जगदात्मशक्त्या
निश्शेषदेवगणशक्तिसमूहमूर्त्या।
तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥२॥

यस्याः प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च न हि वक्तुमलं बलं च।
सा चण्डिकाखिलजगत्परिपालनाय
नाशाय चाशुभभयस्य मतिं करोतु ॥३॥

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥४॥

किं वर्णयाम तव रूपमचिन्त्यमेतत्
किं चातिवीर्यमसुरक्षयकारि भूरि।
किं चाहवेषु चरितानि तवाद्भुतानि
सर्वेषु देव्यसुरदेवगणादिकेषु ॥५॥

हेतुः समस्तजगतां त्रिगुणापि दोषै-
र्न ज्ञायसे हरिहरादिभिरप्यपारा।

सर्वाश्रयाखिलमिदं जगदंशभूतम्
अव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥६॥

यस्याः समस्तसुरता समुदीरणेन
तृप्तिं प्रयाति सकलेषु मखेषु देवि।
स्वाहासि वै पितृगणस्य च तृप्तिहेतु-
रुच्चार्यसे त्वमत एव जनैः स्वधा च ॥७॥

या मुक्तिहेतुरविचिन्त्यमहाव्रता त्व-
मभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः।
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै-
र्विद्यासि सा भगवती परमा हि देवि ॥८॥

शब्दात्मिका सुविमलर्ग्यजुषां निधान-
मुद्गीथरम्यपदपाठवतां च साम्नाम्।
देवी त्रयी भगवती भवभावनाय
वार्ता च सर्वजगतां परमार्तिहन्त्री ॥९॥

मेधासि देवि विदिताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसङ्गा।
श्रीः कैटभारिहृदयैककृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥१०॥

ईषत्सहासममलं परिपूर्णचन्द्र-
बिम्बानुकारि कनकोत्तमकान्तिकान्तम्।
अत्यद्भुतं प्रहृतमात्तरुषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण ॥११॥

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकराल-
मुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः।

प्राणान्मुमोच महिषस्तदतीव चित्रं
कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥१२॥

देवि प्रसीद परमा भवती भवाय
सद्यो विनाशयसि कोपवती कुलानि।
विज्ञातमेतदधुनैव यदस्तमेत-
न्नीतं बलं सुविपुलं महिषासुरस्य ॥१३॥

ते सम्मता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति धर्मवर्गः।
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना ॥१४॥

धर्म्याणि देवि सकलानि सदैव कर्मा-
ण्यत्यादृतः प्रतिदिनं सुकृती करोति।
स्वर्गं प्रयाति च ततो भवतीप्रसादा-
ल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥१५॥

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता ॥१६॥

एभिर्हतैर्जगदुपैति सुखं तथैते
कुर्वन्तु नाम नरकाय चिराय पापम्।
सङ्ग्राममृत्युमधिगम्य दिवं प्रयान्तु
मत्वेति नूनमहितान् विनिहंसि देवि ॥१७॥

दृष्ट्वैव किं न भवती प्रकरोति भस्म
सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम्।
लोकान् प्रयान्तु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी ॥१८॥

खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः
शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम्।
यन्नागता विलयमंशुमदिन्दुखण्ड-
योग्याननं तव विलोकयतां तदेतत् ॥१९॥

दुर्वृत्तवृत्तशमनं तव देवि शीलं
रूपं तथैतदविचिन्त्यमतुल्यमन्यैः।
वीर्यं च हन्तृ हृतदेवपराक्रमाणां
वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥२०॥

केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपं च शत्रुभयकार्यतिहारि कुत्र।
चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥२१॥

त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्धनि तेऽपि हत्वा।
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवं नमस्ते ॥२२॥

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥२३॥

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥२४॥

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते।
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् ॥२५॥

खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः ॥२६॥

# अपराजितास्तोत्रम्

देवा ऊचुः।

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥१॥

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥२॥

कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥३॥

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥४॥

अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥५॥

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६॥

या देवी सर्वभूतेषु चेतनेत्यभिधीयते।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७॥

या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८॥

या देवी सर्वभूतेषु निद्रारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥९॥

या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१०॥

या देवी सर्वभूतेषु छायारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥११॥

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१२॥

या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१३॥

या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१४॥

या देवी सर्वभूतेषु जातिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१५॥

या देवी सर्वभूतेषु लज्जारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१६॥

या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१७॥

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१८॥

या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१९॥

या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२०॥

या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२१॥

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२२॥

या देवी सर्वभूतेषु दयारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२३॥

या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२४॥

या देवी सर्वभूतेषु मातृरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२५॥

या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२६॥

इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या।
भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः ॥२७॥

चितिरूपेण या कृत्स्नमेतद् व्याप्य स्थिता जगत्।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२८॥

स्तुता सुरैः पूर्वमभीष्टसंश्रया-
त्तथा सुरेन्द्रेण दिनेषु सेविता।
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः ॥२९॥

या साम्प्रतं चोद्धतदैत्यतापितै-
रस्माभिरीशा च सुरैर्नमस्यते।
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वापदो भक्तिविनम्रमूर्तिभिः ॥३०॥

# नारायणीसूक्तम्

ॐ ऋषिरुवाच।

देव्या हते तत्र महासुरेन्द्रे
सेन्द्राः सुरा वह्निपुरोगमास्ताम्।
कात्यायनीं तुष्टुवुरिष्टलाभाद्
विकाशिवक्त्राब्ज विकाशिताशाः ॥१॥

देवि प्रपन्नार्तिहरे प्रसीद
प्रसीद मातर्जगतोऽखिलस्य।
प्रसीद विश्वेश्वरि पाहि विश्वं
त्वमीश्वरी देवि चराचरस्य ॥२॥

आधारभूता जगतस्त्वमेका
महीस्वरूपेण यतः स्थितासि।
अपां स्वरूपस्थितया त्वयैत-
दाप्यायते कृत्स्नमलङ्घ्यवीर्ये ॥३॥

त्वं वैष्णवी शक्तिरनन्तवीर्या
विश्वस्य बीजं परमासि माया।
सम्मोहितं देवि समस्तमेतत्
त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥४॥

विद्याः समस्तास्तव देवि भेदाः
स्त्रियः समस्ताः सकला जगत्सु।
त्वयैकया पूरितमम्बयैतत्
का ते स्तुतिः स्तव्यपरा परोक्तिः ॥५॥

सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी।
त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ॥६॥

सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते।
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥७॥

कलाकाष्ठादिरूपेण परिणामप्रदायिनि।
विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ॥८॥

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥९॥

सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि।
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥१०॥

शरणागतदीनार्तपरित्राणपरायणे।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥११॥

हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि।
कौशाम्भःक्षरिके देवि नारायणि नमोऽस्तु ते ॥१२॥

त्रिशूलचन्द्राहिधरे महावृषभवाहिनि।
माहेश्वरीस्वरूपेण नारायणि नमोऽस्तु ते ॥१३॥

मयूरकुक्कुटवृते महाशक्तिधरेऽनघे।
कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते ॥१४॥

शङ्खचक्रगदाशार्ङ्गगृहीतपरमायुधे।
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते ॥१५॥

गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुन्धरे।
वराहरूपिणि शिवे नारायणि नमोऽस्तु ते ॥१६॥

नृसिंहरूपेणोग्रेण हन्तुं दैत्यान् कृतोद्यमे।
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते ॥१७॥

किरीटिनि महावज्रे सहस्रनयनोज्ज्वले।
वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते ॥१८॥

शिवदूतीस्वरूपेण हतदैत्यमहाबले।
घोररूपे महारावे नारायणि नमोऽस्तु ते ॥१९॥

दंष्ट्राकरालवदने शिरोमालाविभूषणे।
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते ॥२०॥

लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे।
महारात्रि महाऽविद्ये नारायणि नमोऽस्तु ते ॥२१॥

मेधे सरस्वति वरे भूति बाभ्रवि तामसि।
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते ॥२२॥

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥२३॥

एतत्ते वदनं सौम्यं लोचनत्रयभूषितम्।
पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते ॥२४॥

ज्वालाकरालमत्युग्रमशेषासुरसूदनम्।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥२५॥

हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत्।
सा घण्टा पातु नो देवि पापेभ्योऽनः सुतानिव ॥२६॥

असुरासृग्वसापङ्कचर्चितस्ते करोज्ज्वलः।
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥२७॥

रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥२८॥

एतत्कृतं यत्कदनं त्वयाद्य धर्मद्विषां देवि महासुराणाम् ।
रूपैरनेकैर्बहुधाऽऽत्ममूर्तिं कृत्वाम्बिके तत्प्रकरोति कान्या ॥२९॥

विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या।
ममत्वगर्तेऽतिमहान्धकारे विभ्रामयत्येतदतीव विश्वम् ॥३०॥

रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र।
दावानलो यत्र यथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वम् ॥३१॥

विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वम्।
विश्वेशवन्द्या भवती भवन्ति विश्वाश्रया ये त्वयि भक्तिनम्राः ॥३२॥

देवि प्रसीद परिपालय नोऽरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः।
पापानि सर्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान् ॥३३॥

प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि।
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥३४॥

देव्युवाच

वरदाहं सुरगणा वरं यन्मनसेच्छथ।
तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ॥३५॥

देवा ऊचुः

सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरी।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥३६॥

# देव्यपराधक्षमापनस्तोत्रम्

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ॥१॥

विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाशक्यत्वात् तव चरणयोर्या च्युतिरभूत् ।
तदेतत्क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥२॥

पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः
परं तेषां मध्ये विरलतरलोऽहं तव सुतः।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥३॥

जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥४॥

परित्यक्ता देवा विविधविधसेवाकुलतया
मया पञ्चाशीतेरधिकमपनीते तु वयसि।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥५॥

श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातङ्को रङ्को विहरति चिरं कोटिकनकैः।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं
जनः को जानीते जननि जपनीयं जपविधौ ॥६॥

चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः।
कपाली भूतेशो भजति जगदीशैकपदवीं
भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥७॥

न मोक्षस्याकाङ्क्षा भवविभववाञ्छापि च न मे
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिव शिव भवानीति जपतः ॥८॥

नाराधितासि विधिना विविधोपचारैः
किं रुक्षचिन्तनपरैर्न कृतं वचोभिः।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे
धत्से कृपामुचितमम्ब परं तवैव ॥९॥

आपत्सु मग्नः स्मरणं त्वदीयं करोमि दुर्गे करुणार्णवे शिवे
नैतच्छठत्वं मम भावयेथाः क्षुधातृषार्ता जननीं स्मरन्ति ॥१०॥

जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि।
अपराधपरम्परावृतं न हि माता समुपेक्षते सुतम् ॥११॥

मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि।
एवं ज्ञात्वा महादेवि यथायोग्यं तथा कुरु ॥१२॥

*॥ इति श्रीशङ्कराचार्यविरचितं देव्यपराधक्षमापनस्तोत्रं सम्पूर्णम् ॥*



## LIST OF ITEMS FOR DEVĪ ANUSHTHĀNAM

1. Chowraṅga (to seat the Shrī Devī Photograph)
2. Photograph of Shrī Devī Durgā Parameshwarī
3. Red Flowers for the Devī
4. Red Silk Āsana to be spread on the Chowraṅga
5. Lamp (Silver/Copper/Brass)
6. Glass cover for the lamp
7. Cow's ghee
8. Cotton wicks (2 long ones)
9. Personal Āsana
10. Āchamana Pātra + Spoon + Plate
11. Japa Mālā is a Must for the Leader of the group to keep count (For the other participants, it is optional)

## INSTRUCTIONS FOR DEVĪ ANUSHTHĀNAM

i) Use The same Japamālā for Ishtamantra and Devī Anushthānam

ii) To keep correct count, Tie a strand of wool between the 28th and 29th beads on either side of the Merū (Central Bead)

iii) Start Mantra **A** from first bead after the Merū

(chant 28 times)

when you reach the wool, turn the Mālā

Chant Mantra **B** 28 times

When you reach the Merū, turn the Mālā

Chant Mantra **C** 108 times from the first bead after the Merū

When you reach the Merū, turn the Mālā

Chant Mantra **B** 28 times

When you reach the wool, turn the Mālā

Chant Mantra **A** 28 times till you reach the Merū again

iv **Saṅkalpa** is simple.

a) Samūhika anushthānam - It should state duration of anushthānam and purpose. Saṅkalpa is made by the group leader. Others may do it silently.

b) Individual anushthānam - Individual saṅkalpa is done, stating duration (3, 5 or 7 days) and purpose of the anushthānam.

v. It is important to do the anushthānam at the same time and same place on all days.

# DEVĪ ANUSHTHĀNAM

## देवी अनुष्ठानम्

१) आचमनम् ॐ ऐं आत्मतत्त्वं शोधयामि नमः स्वाहा ।
ॐ ह्रीं विद्यातत्त्वं शोधयामि नमः स्वाहा ।
ॐ क्लीं शिवतत्त्वं शोधयामि नमः स्वाहा ।
ॐ ऐं ह्रीं क्लीं सर्वतत्त्वं शोधयामि नमः स्वाहा ।

२) प्राणायामः Perform 3 cycles of अनुलोम / विलोम
(इष्ट मन्त्र can be used to keep count)

३) आत्मप्रोक्षणम्– Using your इष्ट मन्त्र or chant
ॐ अपवित्रः पवित्रो वा सर्वाऽवस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

४) आसन शुद्धिः ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

५) दिग्बन्धः ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥

६) सङ्कल्पः

अस्मद्मठस्य मठीयसमाजस्य च अभिवृद्ध्यर्थं गुरुसेवायां निरतानां साधकानां सेवकवर्गाणां च कार्येषु शत्रुत्वस्वरूपीप्रत्यूहविनाशार्थं भगवतीजगदम्बाप्रसादेन उत्तरोत्तरअभिवृद्धिद्वारा सद्बुद्धिस्थिरता-पूर्वकशान्तिसमाधानलाभार्थं सपरिवारश्रीजगदम्बादेवताप्रीत्यर्थं गुर्वनुज्ञया प्रेरिताः वयं देवीमन्त्रजपअनुष्ठानाख्यं कर्म करिष्यामः ॥

| A | - | B | - | C | - | B | - | A |
|---|---|---|---|---|---|---|---|---|
| 28 | | 28 | | 108 | | 28 | | 28 |

A) सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते।

B) शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च।।

C) सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥

समर्पणम्– गुह्यातिगुह्यगोप्त्रि त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥

# SHRĪLALITĀSAHASRANĀMAM

# श्रीललितासहस्रनामस्तोत्रम्

## विनियोग :

अस्य श्रीललितासहस्रनामस्तोत्रमहामन्त्रस्य वशिन्यादिवाग्देवता ऋषयः । अनुष्टुप् छन्दः । श्रीललिता महात्रिपुरसुन्दरी देवता । ऐं बीजम् । सौः शक्तिः । क्लीं कीलकम् । श्रीललिता महा त्रिपुरसुन्दरीप्रसाद सिद्ध्यर्थे जपे विनियोगः ।

॥ध्यानम्॥

सिन्दूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्
तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहाम् ।
पाणिभ्यामलिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्नघटस्थरक्तचरणां ध्यायेत् परामम्बिकाम् ॥१॥

अरुणां करुणातरङ्गिताक्षीं धृतपाशाङ्कुशपुष्पबाणचापाम् ।
अणिमादिभिरावृतां मयूखैरहमित्येव विभावये भवानीम् ॥२॥

ध्यायेत् पद्मासनस्थां विकसितवदनां पद्मपत्रायताक्षीं
हेमाभां पीतवस्त्रां करकलितलसद्धेमपद्मां वराङ्गीम् ।
सर्वालङ्कारयुक्तां सततमभयदां भक्तनम्रां भवानीं
श्रीविद्यां शान्तमूर्तिं सकलसुरनुतां सर्वसम्पत्प्रदात्रीम् ॥३॥

सकुङ्कुमविलेपनामलिकचुम्बिकस्तूरिकां
समन्दहसितेक्षणां सशरचापपाशाङ्कुशाम् ।
अशेषजनमोहिनीमरुणमाल्यभूषाम्बरां
जपाकुसुमभासुरां जपविधौ स्मरेदाम्बिकाम् । ॥४॥

# स्तोत्रम्

॥ॐ॥ श्रीमाता श्रीमहाराज्ञी श्रीमत्सिंहासनेश्वरी।
चिदग्निकुण्डसम्भूता देवकार्यसमुद्यता ॥१॥

उद्यद्भानुसहस्राभा चतुर्बाहुसमन्विता।
रागस्वरूपपाशाढ्या क्रोधाकाराङ्कुशोज्ज्वला ॥२॥

मनोरूपेक्षुकोदण्डा पञ्चतन्मात्रसायका।
निजारुणप्रभापूरमज्जद्ब्रह्माण्डमण्डला ॥३॥

चम्पकाशोकपुन्नागसौगन्धिकलसत्कचा।
कुरुविन्दमणिश्रेणीकनत्कोटीरमण्डिता ॥४॥

अष्टमीचन्द्रविभ्राजदलिकस्थलशोभिता ।
मुखचन्द्रकलङ्काभमृगनाभिविशेषका ॥५॥

वदनस्मरमाङ्गल्यगृहतोरणचिल्लिका।
वक्त्रलक्ष्मीपरीवाहचलन्मीनाभलोचना ॥६॥

नवचम्पकपुष्पाभनासादण्डविराजिता।
ताराकान्तितिरस्कारीनासाभरणभासुरा ॥७॥

कदम्बमञ्जरीक्लृप्तकर्णपूरमनोहरा।
ताटङ्कयुगलीभूततपनोडुपमण्डला ॥८॥

पद्मरागशिलादर्शपरिभाविकपोलभूः
नवविद्रुमबिम्बश्रीन्यक्कारिरदनच्छदा ॥९॥

शुद्धविद्याङ्कुराकारद्विजपङ्क्तिद्वयोज्ज्वला।
कर्पूरवीटिकामोदसमाकर्षिदिगन्तरा ॥१०॥

निजसल्लापमाधुर्यविनिर्भर्त्सितकच्छपी ।
मन्दस्मितप्रभापूरमज्जत्कामेशमानसा ॥११॥

अनाकलितसादृश्यचिबुकश्रीविराजिता ।
कामेशबद्धमाङ्गल्यसूत्रशोभितकन्धरा ॥ १२ ॥

कनकाङ्गदकेयूरकमनीयभुजान्विता ।
रत्नग्रैवेयचिन्ताकलोलमुक्ताफलान्विता ॥१३॥

कामेश्वरप्रेमरत्नमणिप्रतिपणस्तनी ।
नाभ्यालवालरोमालिलताफलकुचद्वयी ॥१४॥

लक्ष्यरोमलताधारतासमुन्नेयमध्यमा
स्तनभारदलन्मध्यपट्टबन्धवलित्रया ॥१५॥

अरुणारुणकौसुम्भवस्त्रभास्वत्कटीतटी ।
रत्नकिङ्किणिकारम्यरशनादामभूषिता ॥१६॥

कामेशज्ञातसौभाग्यमार्दवोरुद्वयान्विता ।
माणिक्यमुकुटाकारजानुद्वयविराजिता ॥१७॥

इन्द्रगोपपरिक्षिप्तस्मरतूणाभजङ्घिका ।
गूढगुल्फाकूर्मपृष्ठजयिष्णुप्रपदान्विता ॥१८॥

नखदीधितिसञ्छन्ननमज्जनतमोगुणा ।
पदद्वयप्रभाजालपराकृतसरोरुहा ॥१९॥

शिञ्जानमणिमञ्जीरमण्डितश्रीपदाम्बुजा ।
मरालीमन्दगमना महालावण्यशेवधिः ॥२०॥

सर्वारुणाऽनवद्याङ्गी सर्वाभरणभूषिता।
शिवकामेश्वराङ्कस्था शिवा स्वाधीनवल्लभा ॥२१॥

सुमेरुमध्यश्रृङ्गस्था श्रीमन्नगरनायिका।
चिन्तामणिगृहान्तस्था पञ्चब्रह्मासनस्थिता ॥२२॥

महापद्माटवीसंस्था कदम्बवनवासिनी।
सुधासागरमध्यस्था कामाक्षी कामदायिनी ॥२३॥

देवर्षिगणसङ्घातस्तूयमानात्मवैभवा।
भण्डासुरवधोद्युक्तशक्तिसेनासमन्विता ॥२४॥

सम्पत्करीसमारूढसिन्धुरव्रजसेविता।
अश्वारूढाधिष्ठिताश्वकोटिकोटिभिरावृता ॥२५॥

चक्रराजरथारूढसर्वायुधपरिष्कृता।
गेयचक्ररथारूढमन्त्रिणीपरिसेविता ॥२६॥

किरिचक्ररथारूढदण्डनाथपुरस्कृता।
ज्वालामालिनिकाक्षिप्तवह्निप्राकारमध्यगा ॥२७॥

भण्डसैन्यवधोद्युक्तशक्तिविक्रमहर्षिता।
नित्यापराक्रमाटोपनिरीक्षणसमुत्सुका ॥२८॥

भण्डपुत्रवधोद्युक्तबालाविक्रमनन्दिता।
मन्त्रिण्यम्बाविरचितविषङ्गवधतोषिता ॥२९॥

विशुक्रप्राणहरणवाराहीवीर्यनन्दिता।
कामेश्वरमुखालोककल्पितश्रीगणेश्वरा ॥३०॥

महागणेशनिर्भिन्नविघ्नयन्त्रप्रहर्षिता।
भण्डासुरेन्द्रनिर्मुक्तशस्त्रप्रत्यस्त्रवर्षिणी ॥३१॥

कराङ्गुलिनखोत्पन्ननारायणदशाकृतिः।
महापाशुपतास्त्राग्निनिर्दग्धासुरसैनिका ॥३२॥

कामेश्वरास्त्रनिर्दग्धसभण्डासुरशून्यका।
ब्रह्मोपेन्द्रमहेन्द्रादिदेवसंस्तुतवैभवा ॥३३॥

हरनैत्राग्निसन्दग्धकामसञ्जीवनौषधिः।
श्रीमद्वाग्भवकूटैकस्वरूपमुखपङ्कजा ॥३४॥

कण्ठाधः कटिपर्यन्तमध्यकूटस्वरूपिणी।
शक्तिकूटैकतापन्नकट्यधोभागधारिणी ॥३५॥

मूलमन्त्रात्मिका मूलकूटत्रयकलेवरा।
कुलामृतैकरसिका कुलसङ्केतपालिनी ॥३६॥

कुलाङ्गना कुलान्तस्था कौलिनी कुलयोगिनी।
अकुला समयान्तस्था समयाचारतत्परा ॥३७॥

मूलाधारैकनिलया ब्रह्मग्रन्थिविभेदिनी।
मणिपूरान्तरुदिता विष्णुग्रन्थिविभेदिनी ॥३८॥

आज्ञाचक्रान्तरालस्था रुद्रग्रन्थिविभेदिनी
सहस्त्राराम्बुजारूढा सुधासाराभिवर्षिणी ॥३९॥

तडिल्लतासमरुचिः षट्चक्रोपरि संस्थिता।
महासक्तिः कुण्डलिनी बिसतन्तु तनीयसी ॥४०॥

भवानी भावनागम्या भवारण्यकुठारिका।
भद्रप्रिया भद्रमूर्तिर्भक्तसौभाग्यदायिनी ॥४१॥

भक्तिप्रिया भक्तिगम्या भक्तिवश्या भयापहा।
शाम्भवी शारदाराध्या शर्वाणी शर्मदायिनी ॥४२॥

शाङ्करी श्रीकरी साध्वी शरच्चन्द्रनिभानना।
शातोदरी शान्तिमती निराधारा निरञ्जना ॥४३॥

निर्लेपा निर्मला नित्या निराकारा निराकुला।
निर्गुणा निष्कला शान्ता निष्कामा निरुपप्लवा ॥४४॥

नित्यमुक्ता निर्विकारा निष्प्रपञ्चा निराश्रया।
नित्यशुद्धा नित्यबुद्धा निरवद्या निरन्तरा ॥४५॥

निष्कारणा निष्कलङ्का निरुपाधिर्निरीश्वरा।
नीरागा रागमथना निर्मदा मदनाशिनी ॥४६॥

निश्चिन्ता निरहङ्कारा निर्मोहा मोहनाशिनी।
निर्ममा ममताहन्त्री निष्पापा पापनाशिनी ॥४७॥

निष्क्रोधा क्रोधशमनी निर्लोभा लोभनाशिनी।
निस्संशया संशयघ्नी निर्भवा भवनाशिनी ॥४८॥

निर्विकल्पा निराबाधा निर्भेदा भेदनाशिनी।
निर्नाशा मृत्युमथनी निष्क्रिया निष्परिग्रहा ॥४९॥

निस्तुला नीलचिकुरा निरपाया निरत्यया।
दुर्लभा दुर्गमा दुर्गा दुःखहन्त्री सुखप्रदा ॥५०॥

दुष्टदूरा दुराचारशमनी दोषवर्जिता।
सर्वज्ञा सान्द्रकरुणा समानाधिकवर्जिता ॥५१॥

सर्वशक्तिमयी सर्वमङ्गला सद्गतिप्रदा।
सर्वेश्वरी सर्वमयी सर्वमन्त्रस्वरूपिणी ॥५२॥

सर्वयन्त्रात्मिका सर्वतन्त्ररूपा मनोन्मनी।
माहेश्वरी महादेवी महालक्ष्मीर्मृडप्रिया ॥५३॥

महारूपा महापूज्या महापातकनाशिनी।
महामाया महासत्त्वा महाशक्तिर्महारतिः ॥५४॥

महाभोगा महैश्वर्या महावीर्या महाबला।
महाबुद्धिर्महासिद्धिर्महायोगेश्वरेश्वरी ॥५५॥

महातन्त्रा महामन्त्रा महायन्त्रा महासना।
महायागक्रमाराध्या महाभैरवपूजिता ॥५६॥

महेश्वरमहाकल्पमहाताण्डवसाक्षिणी।
महाकामेशमहिषी महात्रिपुरसुन्दरी ॥५७॥

चतुष्षट्युपचाराढ्या चतुष्षष्टिकलामयी।
महाचतुःषष्टिकोटियोगिनीगणसेविता ॥५८॥

मनुविद्या चन्द्रविद्या चन्द्रमण्डलमध्यगा।
चारुरूपा चारुहासा चारुचन्द्रकलाधरा ॥५९॥

चराचरजगन्नाथा चक्रराजनिकेतना।
पार्वती पद्मनयना पद्मरागसमप्रभा ॥६०॥

पञ्चप्रेतासनासीना पञ्चब्रह्मस्वरूपिणी।
चिन्मयी परमानन्दा विज्ञानघनरूपिणी ॥६१॥

ध्यानध्यातृध्येयरूपा धर्माधर्मविवर्जिता।
विश्वरूपा जागरिणी स्वपन्ती तैजसात्मिका ॥६२॥

सुप्ता प्राज्ञात्मिका तुर्या सर्वावस्थाविवर्जिता।
सृष्टिकर्त्री ब्रह्मरूपा गोप्त्री गोविन्दरूपिणी ॥६३॥

संहारिणी रुद्ररूपा तिरोधानकरीश्वरी।
सदाशिवाऽनुग्रहदा पञ्चकृत्यपरायणा ॥६४॥

भानुमण्डलमध्यस्था भैरवी भगमालिनी।
पद्मासना भगवती पद्मनाभसहोदरी ॥६५॥

उन्मेषनिमिषोत्पन्नविपन्नभुवनावलिः ।
सहस्रशीर्षवदना सहस्राक्षी सहस्रपात् ॥६६॥

आब्रह्मकीटजननी वर्णाश्रमविधायिनी।
निजाज्ञारूपनिगमा पुण्यापुण्यफलप्रदा ॥६७॥

श्रुतिसीमन्तसिन्दूरीकृतपादाब्जधूलिका।
सकलागमसन्दोहशुक्तिसम्पुटमौक्तिका ॥६८॥

पुरुषार्थप्रदा पूर्णा भोगिनी भुवनेश्वरी।
अम्बिकाऽनादिनिधना हरिब्रह्मेन्द्रसेविता ॥६९॥

नारायणी नादरूपा नामरूपविवर्जिता।
ह्रीङ्कारी ह्रीमती हृद्या हेयोपादेयवर्जिता ॥७०॥

राजराजार्चिता राज्ञी रम्या राजीवलोचना।
रञ्जनी रमणी रस्या रणत्किङ्किणिमेखला ॥७१॥

रमा राकेन्दुवदना रतिरूपा रतिप्रिया।
रक्षाकरी राक्षसघ्नी रामा रमणलम्पटा ॥७२॥

काम्या कामकलारूपा कदम्बकुसुमप्रिया।
कल्याणी जगतीकन्दा करुणारससागरा ॥७३॥

कलावती कलालापा कान्ता कादम्बरीप्रिया।
वरदा वामनयना वारुणीमदविह्वला ॥७४॥

विश्वाधिका वेदवेद्या विन्ध्याचलनिवासिनी।
विधात्री वेदजननी विष्णुमाया विलासिनी ॥७५॥

क्षेत्रस्वरूपा क्षेत्रेशी क्षेत्रक्षेत्रज्ञपालिनी।
क्षयवृद्धिविनिर्मुक्ता क्षेत्रपालसमर्चिता ॥७६॥

विजया विमला वन्द्या वन्दारुजनवत्सला।
वाग्वादिनी वामकेशी वह्निमण्डलवासिनी ॥७७॥

भक्तिमत्कल्पलतिका पशुपाशविमोचिनी।
संहृताशेषपाखण्डा सदाचारप्रवर्तिका ॥७८॥

तापत्रयाग्निसन्तप्तसमाह्लादनचन्द्रिका।
तरुणी तापसाराध्या तनुमध्या तमोऽपहा ॥७९॥

चितिस्तत्पदलक्ष्यार्था चिदेकरसरूपिणी।
स्वात्मानन्दलवीभूतब्रह्माद्यानन्दसन्ततिः ॥८०॥

परा प्रत्यक्चितीरूपा पश्यन्ती परदेवता।
मध्यमा वैखरीरूपा भक्तमानसहंसिका ॥८१॥

कामेश्वरप्राणनाडी कृतज्ञा कामपूजिता।
शृङ्गाररससम्पूर्णा जया जालन्धरस्थिता ॥८२॥

ओड्याणपीठनिलया बिन्दुमण्डलवासिनी।
रहोयागक्रमाराध्या रहस्तर्पणतर्पिता ॥८३॥

सद्यः प्रसादिनी विश्वसाक्षिणी साक्षिवर्जिता।
षडङ्गदेवतायुक्ता षाड्गुण्यपरिपूरिता ॥८४॥

नित्यक्लिन्ना निरुपमा निर्वाणसुखदायिनी।
नित्याषोडशिकारूपा श्रीकण्ठार्धशरीरिणी ॥८५॥

प्रभावती प्रभारूपा प्रसिद्धा परमेश्वरी।
मूलप्रकृतिरव्यक्ता व्यक्ताव्यक्तस्वरूपिणी ॥८६॥

व्यापिनी विविधाकारा विद्याविद्यास्वरूपिणी।
महाकामेशनयनकुमुदाह्लादकौमुदी ॥८७॥

भक्तहार्दतमोभेदभानुमद्भानुसन्ततिः।
शिवदूती शिवाराध्या शिवमूर्तिः शिवङ्करी ॥८८॥

शिवप्रिया शिवपरा शिष्टेष्टा शिष्टपूजिता।
अप्रमेया स्वप्रकाशा मनोवाचामगोचरा ॥८९॥

चिच्छक्तिश्चेतनारूपा जडशक्तिर्जडात्मिका।
गायत्री व्याहृतिः संध्या द्विजबृन्दनिषेविता ॥९०॥

तत्त्वासना तत्त्वमयी पञ्चकोशान्तरस्थिता।
निस्सीममहिमा नित्ययौवना मदशालिनी ॥९१॥

मदघूर्णितरक्ताक्षी मदपाटलगण्डभूः।
चन्दन द्रव दिग्धाङ्गी चाम्पेयकुसुमप्रिया ॥९२॥

कुशला कोमलाकारा कुरुकुल्ला कुलेश्वरी।
कुलकुण्डालया कौलमार्गतत्परसेविता ॥९३॥

कुमारगणनाथाम्बा तुष्टिः पुष्टिर्मतिर्धृतिः।
शान्तिः स्वस्तिमती कान्तिर्नन्दिनी विघ्ननाशिनी ॥९४॥

तेजोवती त्रिनयना लोलाक्षी कामरूपिणी।
मालिनी हंसिनी माता मलयाचलवासिनी ॥९५॥

सुमुखी नलिनी सुभ्रूः शोभना सुरनायिका।
कालकण्ठी कान्तिमती क्षोभिणी सूक्ष्मरूपिणी ॥९६॥

वज्रेश्वरी वामदेवी वयोवस्थाविवर्जिता।
सिद्धेश्वरी सिद्धविद्या सिद्धमाता यशस्विनी ॥९७॥

विशुद्धचक्रनिलयाऽऽरक्तवर्णा त्रिलोचना ।
खट्वाङ्गादिप्रहरणा वदनैकसमन्विता ॥९८॥

पायसान्नप्रिया त्वक्स्था पशुलोकभयङ्करी।
अमृतादिमहाशक्तिसंवृता डाकिनीश्वरी ॥९९॥

अनाहताब्जनिलया श्यामाभावदनद्वया।
दंष्ट्रोज्ज्वलाक्षमालादिधरा रुधिरसंस्थिता ॥१००॥

कालरात्र्यादिशक्त्यौघवृता स्निग्धौदनप्रिया।
महावीरेन्द्रवरदा राकिण्यम्बास्वरूपिणी ॥१०१॥

मणिपूराब्जनिलया वदनत्रयसंयुता
वज्रादिकायुधोपेता डामर्यादिभिरावृता ॥१०२॥

रक्तवर्णा मांसनिष्ठा गुडान्नप्रीतमानसा।
समस्तभक्तसुखदा लाकिन्यम्बास्वरूपिणी ॥१०३॥

स्वाधिष्ठानाम्बुजगता चतुर्वक्त्रमनोहरा।
शूलाद्यायुधसम्पन्ना पीतवर्णाऽतिगर्विता ॥१०४॥

मेदोनिष्ठा मधुप्रीता बन्दिन्यादिसमन्विता।
दध्यन्नासक्तहृदया काकिनीरूपधारिणी ॥१०५॥

मूलाधाराम्बुजारूढा पञ्चवक्त्राऽस्थिसंस्थिता।
अङ्कुशादिप्रहरणा वरदादिनिषेविता ॥१०६॥

मुद्गौदनासक्तचित्ता साकिन्यम्बास्वरूपिणी।
आज्ञाचक्राब्जनिलया शुक्लवर्णा षडानना ॥१०७॥

मज्जासंस्था हंसवती मुख्यशक्तिसमन्विता।
हरिद्रानैकरसिका हाकिनीरूपधारिणी ॥१०८॥

सहस्रदलपद्मस्था सर्ववर्णोपशोभिता।
सर्वायुधधरा शुक्लसंस्थिता सर्वतोमुखी ॥१०९॥

सर्वौदनप्रीतचित्ता याकिन्यम्बास्वरूपिणी।
स्वाहा स्वधामतिर्मेधा श्रुतिः स्मृतिरनुत्तमा ॥११०॥

पुण्यकीर्तिः पुण्यलभ्या पुण्यश्रवणकीर्तना।
पुलोमजार्चिता बन्धमोचनी बर्बरालका ॥१११॥

विमर्शरूपिणी विद्या वियदादिजगत्प्रसूः।
सर्वव्याधिप्रशमनी सर्वमृत्युनिवारिणी ॥११२॥

अग्रगण्याऽचिन्त्यरूपा कलिकल्मषनाशिनी।
कात्यायनी कालहन्त्री कमलाक्षनिषेविता ॥११३॥

ताम्बूलपूरितमुखी दाडिमीकुसुमप्रभा।
मृगाक्षी मोहिनी मुख्या मृडानी मित्ररूपिणी ॥११४॥

नित्यतृप्ता भक्तनिधिर्नियन्त्री निखिलेश्वरी।
मैत्र्यादिवासनालभ्या महाप्रलयसाक्षिणी ॥११५॥

पराशक्तिः परानिष्ठा प्रज्ञानघनरूपिणी।
माध्वीपानालसा मत्ता मातृकावर्णरूपिणी ॥११६॥

महाकैलासनिलया मृणालमृदुदोर्लता।
महनीया दयामूर्तिर्महासाम्राज्यशालिनी ॥११७॥

आत्मविद्या महाविद्या श्रीविद्या कामसेविता।
श्रीषोडशाक्षरीविद्या त्रिकूटा कामकोटिका ॥११८॥

कटाक्षकिङ्करीभूतकमलाकोटिसेविता।
शिरःस्थिता चन्द्रनिभा भालस्थेन्द्रधनुःप्रभा ॥११९॥

हृदयस्था रविप्रख्या त्रिकोणान्तरदीपिका।
दाक्षायणी दैत्यहन्त्री दक्षयज्ञविनाशिनी ॥१२०॥

दरान्दोलितदीर्घाक्षी दरहासोज्ज्वलन्मुखी।
गुरुमूर्तिर्गुणनिधिर्गोमाता गुहजन्मभूः ॥१२१॥

देवेशी दण्डनीतिस्था दहराकाशरूपिणी।
प्रतिपन्मुख्यराकान्ततिथिमण्डलपूजिता ॥१२२॥

कलात्मिका कलानाथा काव्यालापविनोदिनी।
सचामररमावाणीसव्यदक्षिणसेविता ॥१२३॥

आदिशक्तिरमेयात्मा परमा पावनाकृतिः।
अनेककोटिब्रह्माण्डजननी दिव्यविग्रहा ॥१२४॥

क्लीङ्कारी केवला गुह्या कैवल्यपददायिनी।
त्रिपुरा त्रिजगद्वन्द्या त्रिमूर्तिस्त्रिदशेश्वरी ॥१२५॥

त्र्यक्षरी दिव्यगन्धाढ्या सिन्दूरतिलकाञ्चिता।
उमा शैलेन्द्रतनया गौरी गन्धर्वसेविता ॥१२६॥

विश्वगर्भा स्वर्णगर्भावरदा वागधीश्वरी।
ध्यानगम्याऽपरिच्छेद्या ज्ञानदा ज्ञानविग्रहा ॥१२७॥

सर्ववेदान्तसंवेद्या सत्यानन्दस्वरूपिणी।
लोपामुद्रार्चिता लीलाक्लृप्तब्रह्माण्डमण्डला ॥१२८॥

अदृश्या दृश्यरहिता विज्ञात्री वेद्यवर्जिता।
योगिनी योगदा योग्या योगानन्दा युगन्धरा ॥१२९॥

इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिणी।
सर्वाधारा सुप्रतिष्ठा सदसद्रूपधारिणी ॥१३०॥

अष्टमूर्तिरजाजैत्री लोकयात्राविधायिनी।
एकाकिनी भूमरूपा निर्द्वैता द्वैतवर्जिता ॥१३१॥

अन्नदा वसुदा वृद्धा ब्रह्मात्मैक्यस्वरूपिणी।
बृहती ब्राह्मणी ब्राह्मी ब्रह्मानन्दा बलिप्रिया ॥१३२॥

भाषारूपा बृहत्सेना भावाभावविवर्जिता।
सुखाराध्या शुभकरी शोभनासुलभागतिः ॥१३३॥

राजराजेश्वरी राज्यदायिनी राज्यवल्लभा।
राजत्कृपा राजपीठनिवेशितनिजाश्रिता ॥१३४॥

राज्यलक्ष्मीः कोशनाथा चतुरङ्गबलेश्वरी।
साम्राज्यदायिनी सत्यसन्धा सागरमेखला ॥१३५॥

दीक्षिता दैत्यशमनी सर्वलोकवशङ्करी।
सर्वार्थदात्री सावित्री सच्चिदानन्दरूपिणी ॥१३६॥

देशकालापरिच्छिन्ना सर्वगा सर्वमोहिनी।
सरस्वती शास्त्रमयी गुहाम्बा गुह्यरुपिणी ॥१३७॥

सर्वोपाधिविनिर्मुक्ता सदाशिवपतिव्रता।
सम्प्रदायेश्वरी साध्वी गुरुमण्डलरूपिणी ॥१३८॥

कुलोत्तीर्णा भगाराध्या माया मधुमती मही।
गणाम्बा गुह्यकाराध्या कोमलाङ्गी गुरुप्रिया ॥१३९॥

स्वतन्त्रा सर्वतन्त्रेशी दक्षिणामूर्तिरूपिणी।
सनकादिसमाराध्या शिवज्ञानप्रदायिनी ॥१४०॥

चित्कलानन्दकलिका प्रेमरूपा प्रियङ्करी।
नामपारायणप्रीता नन्दिविद्या नटेश्वरी ॥१४१॥

मिथ्याजगदधिष्ठाना मुक्तिदा मुक्तिरूपिणी।
लास्यप्रिया लयकरी लज्जा रम्भादिवन्दिता ॥१४२॥

भवदावसुधावृष्टिः पापारण्यदवानला।
दौर्भाग्यतूलवातूला जराध्वान्तरविप्रभा ॥१४३॥

भाग्याब्धिचन्द्रिका भक्तचित्तकेकिघनाघना।
रोगपर्वतदम्भोलिर्मृत्युदारुकुठारिका ॥१४४॥

महेश्वरी महाकाली महाग्रासा महाशना।
अपर्णा चण्डिका चण्डमुण्डासुरनिषूदिनी ॥१४५॥

क्षराक्षरात्मिका सर्वलोकेशी विश्वधारिणी।
त्रिवर्गदात्री सुभगा त्र्यम्बका त्रिगुणात्मिका ॥१४६॥

स्वर्गापवर्गदा शुद्धा जपापुष्पनिभाकृतिः।
ओजोवती द्युतिधरा यज्ञरूपा प्रियव्रता ॥१४७॥

दुराराध्या दुराधर्षा पाटलीकुसुमप्रिया।
महती मेरुनिलया मन्दारकुसुमप्रिया ॥१४८॥

वीराराध्या विराड्रूपा विरजा विश्वतोमुखी।
प्रत्यग्रूपा पराकाशा प्राणदा प्राणरूपिणी ॥१४९॥

मार्ताण्डभैरवाराध्या मन्त्रिणीन्यस्तराज्यधूः।
त्रिपुरेशी जयत्सेना निस्त्रैगुण्या परापरा ॥१५०॥

सत्यज्ञानानन्दरूपा सामरस्यपरायणा।
कपर्दिनी कलामाला कामधुक् कामरूपिणी ॥१५१॥

कलानिधिः काव्यकला रसज्ञा रसशेवधि :
पुष्टा पुरातना पूज्या पुष्करा पुष्करेक्षणा ॥१५२॥

परञ्ज्योतिः परन्धाम परमाणुः परात्परा।
पाशहस्ता पाशहन्त्री परमन्त्रविभेदिनी ॥१५३॥

मूर्ताऽमूर्तानित्यतृप्ता मुनिमानसहंसिका।
सत्यव्रता सत्यरूपा सर्वान्तर्यामिनी सती ॥१५४॥

ब्रह्माणी ब्रह्मजननी बहुरूपा बुधार्चिता।
प्रसवित्री प्रचण्डाऽऽज्ञा प्रतिष्ठा प्रकटाकृतिः ॥१५५॥

प्राणेश्वरी प्राणदात्री पञ्चाशत्पीठरूपिणी।
विशृङ्खला विविक्तस्था वीरमाता वियत्प्रसूः ॥१५६॥

मुकुन्दा मुक्तिनिलया मूलविग्रहरूपिणी।
भावज्ञा भवरोगघ्नी भवचक्रप्रवर्तिनी ॥१५७॥

छन्दः सारा शास्त्रसारा मन्त्रसारा तलोदरी।
उदारकीर्तिरुद्दामवैभवा वर्णरूपिणी ॥ १५८॥

जन्ममृत्युजरातप्तजनविश्रान्तिदायिनी।
सर्वोपनिषदुद्घुष्टा शान्त्यतीतकलात्मिका ॥१५९॥

गम्भीरा गगनान्तस्था गर्विता गानलोलुपा।
कल्पनारहिता काष्ठाकान्ता कान्तार्धविग्रहा ॥१६०॥

कार्यकारणनिर्मुक्ता कामकेलितरङ्गिता।
कनत्कनकताटङ्का लीलाविग्रहधारिणी ॥१६१॥

अजा क्षयविनिर्मुक्ता मुग्धा क्षिप्रप्रसादिनी।
अन्तर्मुखसमाराध्या बहिर्मुखसुदुर्लभा ॥१६२॥

त्रयी त्रिवर्गनिलया त्रिस्था त्रिपुरमालिनी।
निरामया निरालम्बा स्वात्मारामा सुधासृतिः ॥१६३॥

संसारपङ्कनिर्मग्नसमुद्धरणपण्डिता।
यज्ञप्रिया यज्ञकर्त्री यजमानस्वरूपिणी ॥१६४॥

धर्माधारा धनाध्यक्षा धनधान्यविवर्धिनी।
विप्रप्रिया विप्ररूपा विश्वभ्रमणकारिणी ॥१६५॥

विश्वग्रासा विद्रुमाभा वैष्णवी विष्णुरूपिणी।
अयोनिर्योनिनिलया कूटस्था कुलरूपिणी ॥१६६॥

वीरगोष्ठीप्रिया वीरा नैष्कर्म्या नादरूपिणी।
विज्ञानकलना कल्या विदग्धा बैन्दवासना ॥१६७॥

तत्त्वाधिका तत्त्वमयी तत्त्वमर्थस्वरूपिणी।
सामगानप्रिया सौम्या सदाशिवकुटुम्बिनी ॥१६८॥

सव्यापसव्यमार्गस्था सर्वापद्विनिवारिणी।
स्वस्था स्वभावमधुरा धीरा धीरसमर्चिता ॥१६९॥

चैतन्यार्घ्यसमाराध्या चैतन्यकुसुमप्रिया।
सदोदिता सदा तुष्टा तरुणादित्यपाटला ॥१७०॥

दक्षिणादक्षिणाराध्या दरस्मेरमुखाम्बुजा।
कौलिनीकेवलानर्घ्यकैवल्यपददायिनी ॥१७१॥

स्तोत्रप्रिया स्तुतिमती श्रुतिसंस्तुतवैभवा।
मनस्विनी मानवती महेशी मङ्गलाकृतिः ॥१७२॥

विश्वमाता जगद्धात्री विशालाक्षी विरागिणी।
प्रगल्भा परमोदारा परामोदा मनोमयी ॥१७३॥

व्योमकेशी विमानस्था वज्रिणी वामकेश्वरी।
पञ्चयज्ञप्रिया पञ्चप्रेतमञ्चाधिशायिनी ॥१७४॥

पञ्चमी पञ्चभूतेशी पञ्चसंख्योपचारिणी।
शाश्वती शाश्वतैश्वर्या शर्मदा शम्भुमोहिनी ॥१७५॥

धरा धरसुता धन्या धर्मिणी धर्मवर्धिनी।
लोकातीता गुणातीता सर्वातीता शमात्मिका ॥१७६॥

बन्धूककुसुमप्रख्या बाला लीलाविनोदिनी।
सुमङ्गली सुखकरी सुवेषाढ्या सुवासिनी ॥१७७॥

सुवासिन्यर्चनप्रीताशोभना शुद्धमानसा।
बिन्दुतर्पणसन्तुष्टा पूर्वजा त्रिपुराम्बिका ॥१७८॥

दशमुद्रासमाराध्या त्रिपुराश्रीवशङ्करी।
ज्ञानमुद्रा ज्ञानगम्या ज्ञानज्ञेयस्वरूपिणी ॥१७९॥

योनिमुद्रा त्रिखण्डेशी त्रिगुणाम्बा त्रिकोणगा।
अनघाद्भुतचारित्रा वाञ्छितार्थप्रदायिनी ॥१८०॥

अभ्यासातिशयज्ञाता षडध्वातीतरूपिणी।
अव्याजकरुणामूर्तिरज्ञानध्वान्तदीपिका ॥१८१॥

आबालगोपविदिता सर्वानुल्लङ्घ्यशासना।
श्रीचक्रराजनिलया श्रीमत्त्रिपुरसुन्दरी ॥१८२॥

श्रीशिवा शिवशक्त्यैक्यरूपिणी ललिताम्बिका।
एवं श्रीललितादेव्या नाम्नां साहस्रकं जगुः ॥१८३॥

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे श्रीहयग्रीवागस्त्यसंवादे
श्री ललितासहस्रनामस्तोत्रकथनं नाम द्वितीयोऽध्यायः॥

श्री ललितामहात्रिपुरसुन्दरी जगदम्बार्पणमस्तु॥

विसर्ग बिन्दु मात्राणि पदपादाक्षराणि च
न्यूना चातिरिक्तानि क्षमस्व परमेश्वरि॥

***

## SHRĪMADBHAGAWADGĪTĀ

### DHYĀNA SHLOKA-S

॥ ॐ श्री परमात्मने नमः॥

ध्यान श्लोकाः ॥

ॐ पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं
व्यासेन ग्रथितां पुराणमुनिना मध्ये महाभारतम्।
अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनी -
मम्ब त्वामनुसन्दधामि भगवद्गीते भवद्वेषिणीम् ॥१॥

नमोऽस्तु ते व्यास विशालबुद्धे
फुल्लारविन्दायतपत्रनेत्र।
येन त्वया भारततैलपूर्णः
प्रज्वालितो ज्ञानमयः प्रदीपः ॥२॥

प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये।
ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥३॥

वसुदेवसुतं देवं कंसचाणूरमर्दनम्।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥४॥

॥ ॐ श्री परमात्मने नमः॥

## ADHYĀYA 12 - BHAKTIYOGA

# अथ द्वादशोऽध्यायः

*अर्जुन उवाच*

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥१॥

*श्रीभगवानुवाच*

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥२॥

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥३॥

सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥४॥

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥५॥

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥६॥

तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।
भवामि नचिरात्पार्थ मय्यावेशितचेतसाम् ॥७॥

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥८॥

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥९॥

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव।
मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥१०॥

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥११॥

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाध्द्यानं विशिष्यते।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥१२॥

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥१३॥

सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥१४॥

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥१५॥

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥१६॥

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥१७॥

समः शत्रौ च मित्रे च तथा मानापमानयोः।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥१८॥

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥१९॥

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥२०॥

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगो
नाम द्वादशोऽध्यायः

***

|| ॐ श्री परमात्मने नमः ||

# ADHYĀYA-15-PURUSHOTTAMA YOGA

## अथ पञ्चदशोऽध्यायः

*श्रीभगवानुवाच*

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ||१ ||

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके ||२ ||

न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा ।
अश्वत्थमेनं सुविरुढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा ||३ ||

ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ||४ ||

निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः ।
द्वन्द्वैर्विमुक्ताः सुखदुःखसञ्ज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ||५ ||

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ||६ ||

ममैवांशो जीवलोके जीवभूतः सनातनः।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥७॥

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥८॥

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥९॥

उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम्।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥१०॥

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम्।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥११॥

यदादित्यगतं तेजो जगद्भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥१२॥

गामाविश्य च भूतानि धारयाम्यहमोजसा।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥१३॥

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥१४॥

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च।
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम्॥१५॥

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥१६॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥१७॥

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥१८॥

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम्।
स सर्वविद्भजति मां सर्वभावेन भारत ॥१९॥

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ।
एतद्बुध्द्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥२०॥

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो
नाम पञ्चदशोऽध्यायः

***

## SHIVAMĀNASAPŪJĀSTOTRAM

# शिवमानसपूजास्तोत्रम्

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं
नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम् ।
जातीचम्पकबिल्वपत्ररचितं पुष्पं च धूपं तथा
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥१॥

सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं
भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम् ।
शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं
ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥२॥

छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं
वीणाभेरिमृदङ्गकाहलकला गीतं च नृत्यं तथा ।
साष्टाङ्गं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥३॥

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥४॥

करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वापराधम्।
विदितमविदितं वा सर्वमेतत् क्षमस्व
जय जय करुणाब्धे श्रीमहादेव शम्भो ॥५॥

*॥ इति श्रीमच्छङ्कराचार्यविरचितं शिवमानसपूजास्तोत्रं समाप्तम् ॥*

***

## Shri Chitrāpur Math Publications

**PRINTED MATERIAL-BOOKS**

- Swarna Sudha
- Anthology
- Sadhana Shrunkhala Devnagari
- SHRI GURUPARAMPARA CHARITRA Part 1&2 Kannada
- Dhyana Praveshika
- Pratyushotsav
- Anand Bodhamrit Devanagari
- Anand Bodhamrit English
- Anugraha
- Brief History of SCM
- SCM Brochure
- Guruparampara Saramrit (Marballi)
- Shri Guruparampara Charitra Part 1& 2 Devanagari
- Manache Shloka
- Nitya Path Kannada
- Om Namo Jnan Deepaya Kannada
- Rathotsava (Kannada)
- Sandhyavandanam Devnagari
- Sartha Mantra Devnagari
- Sartha Mantra Kannada
- Ta ma so ma
- Samvit Sankeertan Saar Kannada
- Navratra Nityapath
- Stuti manjari Devnagari Edition 2011
- Stuti Manjari Kannada
- Sadyojat Swadhyay Sudha
- Guru Poojan
- Mahashivratri - Devnagri
- Mahashivratri -Kannada
- Pad Prakshalan to Phalmantrakshat
- Sadhana Panchakam Set 1 & 2
- Stuti Manjari Devnagari
- Stuti Manjari Kannada

- Records of S.C.M.
- Sadguru Bodhamrit
- Rathotsav English
- Chitrapur Nityapath
- Guru Parampara English

**ELECTRONIC MEDIA-CDs'/DVDs'/MP3s'**

- Antarangini I
- Antarangini II
- Antarangini III
- ai Guru Parijnan
- Stotravali I
- Stotravali II
- Stotravali III
- S.C.M. Nitya Nem
- Navaratra Nityapath
- Antarangini IV
- Gurujyoti Yatra
- Lalita Sahasranaam
- Tercentenary Signature Tune
- Dhyana Praveshika cd Konkani
- Guru Jyoti Yatra SCM 6 Cds
- Apar Mahima
- Parijnan Pravachan
- Saraswati Yatra
- Guru parampara CD Naimpalli
- Guruparampara(Bijur)CDPart 1&2
- Navavarsha Darshan
- Gurusmaranam
- Swadhyaya set of 7 CDs

**The Publications are readily available at :**
Shri Chitrapur Math - Shirali, Bangalore
Shri Durga Parameshwari Temple - Karla
Pujya Swamiji's Camps
Mumbai, Borivali: Smt Sharayu Haldipur, Tel:022 2899 0820
Mumbai, Talmakiwadi: Smt Smita Mavinkurve, Tel:022-2381 3105

॥ चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनूभ्यः सञ्चेदं वि च पश्येम ॥

©

॥ श्री चित्रापुर मठः श्रीवल्ली ॥